॥श्रीगणाधिपतयेनमः॥ ॥श्रीसांबायनमः॥ अथब्रह्मतर्कस्तवस्यवार्त्तिकारंविवरणंक्रियते॥तत्रस्तोत्रप्रतिपाद्यसकलार्थप्र
तिज्ञापरोयमाद्यश्लोकः॥ ॥उद्धारश्चेरुपनिषद्वचनप्रकांडेरुन्मीलितश्रुतिगणैरुपबृंहणेश्च॥यत्सादरंसमुदितंयमिनामुपा
स्यंतद्ब्रह्मशंकरभवानितिवर्ण्ययामः॥१॥ प्रशस्तवाचीप्रकांडशब्दः॥प्रशस्तान्युपनिषद्वचनानिकारणवाक्यानितानिहि ब्रह्मसाधा
रणलक्षणभूतकारणत्वमुखेनब्रह्ममर्थयंति॥ब्रह्मविषयत्वेविवादानास्पदतयाब्रह्मप ——युंवाक्येषुप्रकृष्टानितानिचोच्चाव
चान्यनेकभेदानिकानिचित्स्वस्मात्सकलप्र ——वप्रतिपादकानिसदेवसोम्येदमग्र आसीदित्यादिनिकानिचित्कालकृत्वप्रतिपाद
कानि॥एषभूतपतिरेषभूतपालइत्यादीनिकानिच॥स्वस्वस्मिन्प्रविलापकत्वप्रतिपादकानियस्यब्रह्मत्वंस्वंचोभेभवेत्ऽदनइ
त्यादीनिओदनत्वनिरूपणेनैवस्वस्मिन्लेवप्रविलपइत्यापिसूचितं।कानिचित्प्रविशाणित्ववस्थितासंकीर्णरूपदुःखभोजयितृत्वप्रतिपादका
निपृषत्येवसाधुकर्मकारयतितंयमधोलोकेभ्यउन्निनीषतेएषएवासाधुकर्मकारयतितंयमधोनिनीषतइत्यादीनिकानिचेंद्रसूर्या
नलवायुप्रभृतिसकलचेतनाचेतनव्यवस्थितज्योतिश्चक्रभ्रमणोर्ध्वंज्वलनंतिर्याणमनादिस्वभावविशेषव्यवस्थापकत्वप्रतिपादकानि॥
एतस्यैवाक्षरस्यप्रशासनेगार्गीसूर्याचंद्रमसौविधृतौतिष्ठतः॥भीषास्माद्वातःपवतेभीषोदेतिसूर्यइत्यादीनिकानिचिन्मात्रैकज्ञानसंपा
दनद्वारामुक्तिप्रदत्वप्रतिपादकानियमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्मावृणुतेतनूंस्वामित्यादीनिएवंभूतैःकारणवाक्यैस्तेषांशिरपर्यव

सानप्रतिपादकतयातद्विकासकैःपुराणेतिहासरूपैर्बृंहणेश्चचकाराद्ब्रह्मसूत्रेश्चयत्सारंप्रतिपादितंब्रह्मवदुदारेनितर्क्ययामः त्वद्यैर्निश्चिनुमइ
त्यर्थः॥अत्रभवान्ब्रह्मेतिसामानाधिकरण्येनशिवस्यपरब्रह्मभावःस्तोत्रप्रतिपाद्योमुख्यार्थइतिसूचितं॥सत्वतत्रतत्रसाधकोपन्यासे
नबाधकोद्धरणेनचप्रतिपादनीयः॥तत्रसाधकानिसर्वेषांकारणवाक्यानांशिवेपर्यवसानप्रापादयंतीतिप्रथमपादेनसूचि
तंतेषामन्यपरत्वशंकानिरासेनस्वाभिमतार्थेप्रामाण्यप्रतिष्ठापनमुपबृंहणसूत्रेणकरिष्यतइतिद्वितीयपादेनसूचितं॥भवान्परत
त्वमित्यादिस्तुतिंविहायभवान्ब्रह्मेत्यक्त्वापन्नशिवोक्तत्वेननिर्ज्ञातस्तत्रतस्मिन्निकेप्रपदब्रह्मपदप्रयोगोयद्यपिब्रह्मविषयत्वेननि
र्णीतस्तथापितत्रनिर्णायकत्वेनशिवाभिधानश्रुत्युपन्यासश्चबृंहणायनीयःशिवपरब्रह्मस्वभावप्रतिपादकश्रुत्यनुग्राहकत्वेनप्रदर्शयिष्यतइत्यर्थः
सूचितः॥विनिश्चिनुमइत्यनुत्कार्तर्क्ययामइत्युत्तरार्धोक्तोद्धारःसोपिन्यायैःप्रायशःकरिष्यतइत्येतत्सूचितं॥तत्रतावत्प्रतिपादनीया
र्थसाधकान्युपनिषद्वचनान्युपन्यस्यंते॥यद्बृंहणत्वेनान्युपन्यस्यंतेतत्सूत्रसिद्धंतत्कारणत्वमनुमादितयाशिरवाद्यैः॥अत्याश्रमोपनिषदा
हरदिनोतानित्वप्येवंवेदिकंत्वांसिसमर्पयंति॥२॥यतोवाइमानिभूतानिजायंतइत्यादिश्रुत्याब्रह्मसूत्रेणचसिद्धंयत्सभ्राजःश्वे
तकेतुत्रभृतिवब्रह्मणोसाधारणंजगज्जन्मजीवनाहरणादिकारणत्वंनामतत्सर्वाणिकारणवाक्यानित्वय्येवसमर्पयंतीतिप्रतिज्ञात
त्रहेतुगर्भविशेषणं॥अत्याश्रमोपनिषदान्वोदितानीतिश्वेताश्वतराणांमंत्रोपनिषदत्याश्रमोपनिषदुच्यते॥अत्याश्रमिभ्यःपरम

पवित्रं प्रोवाचसम्यगृषिसंघजुष्टंमिति तैत्तिरीयश्वेताश्वतरेएषमहर्षि — अभिध्यः प्रोक्तश्रवणात्तस्यामुपनिषद्युपक्रमेणब्रह्मवादिनो
वदंति किंकारणंब्रह्मकुतःस्मजाताजीवामेकेनक्वचसंप्रतिष्ठाः अधिष्ठिताःकेनसुखेतरेषुवर्तामहेब्रह्मविदोव्यवस्थामिति॥
केषांचिद्ब्रह्मवादिनामृषीणांब्रह्मजगत्कारणमित्येतावदेवपृच्छतांविशिष्यतद्जानतांतन्निर्णयार्थंविचारप्रवृत्तिरुक्तातत्रकिंका
रणंब्रह्मेतिसामान्यतःकारणेब्रह्मणिसंदेहोदर्शितः॥कुतःस्मजाताइत्यादिभिःपंचभिर्वाक्यैःसएवकारणविषयःसंदेहःकार्य
भूतजननजीवनादिप्रतियोगिभेदेनवर्णितःतन्नब्रह्मविदोव्यवस्थेतिपंचमेवाक्येकेनेत्यनुषंगः॥ततश्चवेद्रसूर्यादिवस्तुव्यवस्था
विशिष्टावस्थारूपामुक्तिर्वाकेनेतितदर्थः आद्यव्याख्यानंब्रह्मविदइतिविमृश्यतामेवपरस्परसंबोधनं॥द्वितीयव्याख्याने षष्ठी॥
नन्वेवंविशेषविचारोनिरालंबनःब्रह्मकारणमित्येतस्येवासिद्धेःकार्याणामन्यकारणकल्पस्यवोपपत्तेरित्याशंकानिरासार्थं
तथाप्येवस्वकीयसंदेहधर्मिसिद्धिप्रदर्शनार्थो।नंतरमंत्रः॥कालःस्वभावोनियतिर्यदृच्छाभूतानियोनिःपुरुषइतिचिंत्यं॥संयो
गएषांनत्वात्मभावादात्माप्यनीशःसुखदुःखहेतोरिति॥यदन्योहेत्वकारणकल्पपक्षः॥एवंसंदिहानोनांस्वतोनिर्णेतुमश
क्तानांब्रह्मविद्याधिदेवतायागोर्यःप्रसादेनतन्निर्णयमिच्छतांतत्प्रसादार्थंतेत्यानस्यतत्प्रसादेनतत्कारणंब्रह्मशिवएवेतिने
वानिर्णयआप्तादिसर्थस्यचप्रदर्शनार्थस्तेध्यानयोगानुगताअपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढां॥यःकारणानिनिखिलानि

तानिकालात्मयुक्तान्यधितिष्ठत्येकइत्यादिरुत्तरसंदर्भःतत्रत्यश्चिमर्मज्ञेषुक्षरंप्रधानममृताक्षरंहरः॥तस्मात्सर्वमतःशिवः॥विश्वाधिको
रुद्रोमहर्षिः॥माथिनंतुमहेश्वरमित्यादिषाष्मात्रेहरशिवरुद्रमहेश्वरादिनामभिस्तत्रशिवएवजगत्कारणपरब्रह्मरूपतयानिर्णीतइ
तिस्पष्टः॥एवंशिवस्यजगत्कारणपरब्रह्मरूपत्वनिर्णयोक्तिद्वारासर्वाणिकारणवाक्यानिशिवपरतांनयत्याःश्वेताश्वतरोपनिषदःसा
क्षिभूतान्यथर्वशिरवादिवचनान्यपिदृश्यंतां॥सर्वमिदंब्रह्मविष्णुरुद्रेंद्रास्तेसंभरूपतेसर्वाणिचेंद्रियाणिसहभूतैर्नकारणंकारणानां
धाताध्याताकारणंतुध्येयःसर्वैश्वर्यसंपन्नःसर्वेश्वरःशंभुराकाशमध्यइत्यादीनिअथर्वशिरवाद्यनुगृहीतैःश्वेताश्वतरोपनिषन्म
त्रैःप्रेरितानिसदात्मब्रह्मादिसामान्यशब्दयुक्तानिसर्वाणिकारणवाक्यानिशिवमेवजगत्कारणंपरंब्रह्मप्रतिपादयंतीत्यर्थः॥अ
थोदाहृतश्रुतीनांमन्यपरत्वशंकाशंकनिरासार्थंपौराणिकवचनप्रयोगबृंहणप्रदर्शनार्थंश्लोकः॥पुराशासनपुराणेगिरीशेनल्पास्तं
ब्रह्मेनतरइतिप्रतिपादयंति॥शब्दार्थयोरधिगतादधिकेकरूप्यान्मूलश्रुतीरपिशिवस्तृशंनयत्यः॥२॥कूर्मपुराणेतावत्किंकार
णंब्रह्मेत्यादिवचनात्सुपबृंहितानि।समेत्यतेमहात्मानोमुनयोब्रह्मवादिनः॥तेनिरेचुर्महान्तंवैनात्मविज्ञानसंक्षयं॥किमस्य
जगतोमूलमात्मावास्माकंमवेहि॥कामिस्यात्सर्वभूतानांहेतुरीश्वरएवच॥इत्येवंमन्यमानानांध्यानकर्मावलंबिनां॥आविरासी
न्महादेवोगौरीगिरिवरात्मजाइत्यारभ्यनिरीक्षितास्तेपरमेशपत्न्यातदंतरेदेवमशेषहेतुं॥पश्यंतिशंभुंकविभिर्शितारंरुद्रंबृहंतंपु

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

रुषं पुराणमिति॥शिवपुराणेपि॥मनुष्यापुराकेचिन्मुनयोब्रह्मवादिनः॥संशयाविष्टमनसोविमृशंतियथायथं॥ किंकारणंकु
तोजाताजीवामः केनवावयं॥क्वचास्माकंसंप्रतिष्ठावर्द्धिताः केनवावयं॥केनवर्त्तामहे शश्वत्सुखेष्वन्येषुवाविशं॥अखिलंध्या
त्वविश्वस्यव्यवस्थाकेनवाकृता॥कालःस्वभावोनियतिर्यदृच्छानात्रयुज्यते॥भूतानियोनिःपुरुषोगोपैषांपरोथवा॥अचेतन
त्वात्कालादेश्चेतनत्वेपिचात्मनः॥सुखदुःखादिभिर्भूतसान्नीशत्वाद्विचार्यते॥ते ध्यानयोगानुगताः अपश्यन्शक्तिमेश्वरीं
॥पाशविच्छेदिकांसाक्षान्निगूढांस्वगुणैर्भृशं॥तयासंछिन्नपाशाले सर्वकारणकारणं॥शक्तिमंतंमहादेवमपश्यन्दिव्य
चक्षुषा॥यः कारणान्यशेषाणिकालात्मसहितान्यपि॥अधिष्ठेयानयाशक्त्यासाकमेकोधितिष्ठतीत्यादि॥ अथर्वशिरउप
बृंहणमपिशिवपुराणे॥यस्मात्सर्वमिदंब्रह्मविष्णुरुद्रेंद्रपूर्वकं॥सहभूतेंद्रियैःसर्वैप्रथमंसंप्रसूयते।कारणानांचयोध्रुवा
परमकारणं॥नसंप्रसूयतेन्यस्मात्कुतश्चनकदाचन॥ससर्वैश्वर्यसंपन्नोनान्यासर्वेश्वरःसयं॥सर्वैर्मुमुक्षुभिर्ध्येयःशंभुर
कांशमथांगइति॥अथर्वशिरःकैवल्योपनिषदादीनामपिशिवैकात्मिकब्रह्मकारणत्वादिब्रह्मलिंगादिसमर्पकाण्युपबृंहणान्य
पिशिवपुराणादिषुद्रष्टव्यानि॥एवंशब्दतोर्थतश्चमूलश्रुत्यैकरूपतयामूलश्रुतीनामप्यविरुद्धंशिवपरत्वंप्रतिष्ठापयंति॥
वनसिंहन्यायेनस्वयमपिबलवत्तरंसंतं शिवैकात्मिकमेवजगत्कारणपरब्रह्मभावंव्यवस्थापयंतीत्यर्थः॥स्योऽनुग्रहोपि

देवतांतरपुराणेभ्यःप्राबल्येहेतुरनल्पइत्यनेनदर्शितः॥अस्मिन्हिशिवपुराणानांभूयस्त्वं॥अष्टादशपुराणेषुदशाभिर्गीयते
शिवः॥चतुर्भिर्भगवान्विष्णुर्ब्रह्मांब्रह्मप्रकीर्त्तित इत्युक्तपुराणसंख्ययाशैवंलक्षसंस्कारंलक्षमित्यादिग्रंथसंख्ययावच
नसिंहन्यायातरस्परमनुग्राह्यानुग्राहकभावापन्नाभ्यांश्रुतिनुदुपबृंहणबृंहाभ्यांशिवस्यपरब्रह्मभावसिद्धिर्दर्शिता॥अयत
स्मिन्निरूपयद्ब्रह्मपदप्रयोगेणतस्सिद्धिर्दर्शयति॥हैपायनःसभगवानितिहासरत्नधर्मालजेविटविरूपकमादधानः॥ब्र
ह्मेतिशंकरगिराव्यपदिश्यमूलंब्रह्मशाश्वतमितिप्रकटंचकार॥४॥ महाभारतेसुधिष्ठिरो धर्ममयोमहाद्रुमस्कंधार्जुनो
भीमसेनोऽस्यशाखाः॥माद्रीसूतोपुष्पफलेसमृद्धे मूलंकृष्णोब्रह्मचब्राह्मणाश्चेतियुधिष्ठिरस्यवृक्षरूपेकब्रह्ममूलमि
तिव्यपदिश्यन्०भगवान्व्यासः शिवःपरंब्रह्मेतिस्पष्टंचकारेत्यर्थः॥ननुब्रह्मपदंशिववाचकमितिनाद्यापिसंप्रतिपन्नं
अस्तिहिब्रह्मपदस्यविष्णोर्ब्राह्मणजातौवेदेतपसिचनद्यवहारइत्याशंक्याह॥विष्णुर्हिजाग्रद्विषमाक्षपृथगेरंहीतावे
दस्तेयोपिचनचेतनमध्ययोग्यांवाचावतत्स्थितिकृतेकविरस्यवृत्तिर्मूलस्वरूपणवशाद्दृढनिर्विशंकं॥५॥ विष्णोर्ब्राह्मणा
नांचपृथग्ग्रहणाद्वेदतपसोश्चेतनयोश्चेतनमध्यपाठांगिकोप्रायपाठविरोधान्नतेषांग्रहणंयुक्तं किंनुतेभ्योऽन्यस्यैवक
स्यचिद्वृक्षस्थितोमूलस्यैरराजभावीयगूढ युधिष्ठिरस्थितोकारणभूतस्यैवग्रहणंयुक्तमित्यर्थः तथाभूतश्चशिवएवेति त्व

दर्शं॥ननुद्रोणपर्वणिनारायणकृताशिवस्तोत्ररूपंज्योतिःशब्दआकाशवायुर्दिव्यःस्पर्शःसलिलंगंधउर्वी॥कालोधर्मो
ब्रह्मचब्राह्मणाश्चतत्संभूताःस्थानुवरिष्टउचेदमितिब्रह्मशब्दस्यब्राह्मणशब्दसन्निव्याहारेपिवेदपरत्वंदृष्टंतथह
कथंनस्यादितिचेन्नतत्रज्योतिरित्याद्यचेतनसन्निव्याहारेणतन्नचेतनप्रायपाठाभावादिहतत्सत्वाच्चेतनःशिवए
वग्राह्यः॥ननुश्रीकृष्णस्यसर्वविधसाहायकेनयुधिष्ठिरराज्यस्थिति·हेतुत्वंस्फुटप्रसिद्धंब्राह्मणानामपिजयाशीर्वादेनतुत्वं॥
स्वयंमात्सर्यवन्यानलिनुपास्यामहवयं॥अनुध्यानेनजप्येनविधास्यामःशिवंनवेतिअरण्यंप्रस्थितंयुधिष्ठिरमनुव्रजानेनाम्
गृहीतुमिच्छतांब्राह्मणानामेववचनेनप्रसिद्धं॥नतथाशिवस्यतत्प्रसिद्धं॥अतःश्रीकृष्णस्यात्यंततदुपकारकत्वविशेषणस
मर्पकतयाब्रह्मेतिपदंयोजनीयमितिमेदशंकामपाकरोति॥सात्येनकृष्णइवनस्यहिराज्यसिद्धाशीर्युरेवनःमुखजाइवचत्व
मीशमूलंकपालधरंनित्यमनुग्रहेणतन्मध्यपादविधयस्तद्सित्वमेव॥६॥प्रतिज्ञातमनुग्राहकत्वंतत्तदुपाख्यानोपन्यासे
नस्फुटीकरोति॥केपत्पर्वणितुरंगमेधवृत्तौकैलासशैलगमनेशतरुद्रीयेच॥सौप्तिकावैदिषुशंकरपांडवेषुसानुग्रहत्व
मधिकंहितवयमिदं॥७॥आरण्यपर्वणिकिरातार्जुनीयेसकलदेवासुराद्यविज्ञातसकललोकभयंकरपाशुपतादिव्यास्त्र
प्रदानेनशिवस्यपांडवानुग्राहकत्वंप्रसिद्धं॥द्रोणपर्वणिजयद्रथवधार्थंपिज्ञातविस्मृतपाशुपतास्त्रसंधानप्रकारविशेषपरि

ज्ञानायकृष्णार्जुनयोःकैलासगमनंतत्रशिवंप्रणिपत्यस्तुत्वास्थितयोःशिवनियोगेनामृतसरस्थितौधनुःशरौगृहीत्वाशिवस्यपुरतःस्था
पितवतोःशिवनियुक्तनीललोहितरुद्रकृततद्धनुःशरसंधानप्रदर्शनेनपाशुपतास्त्रसंधानविशेषपरिज्ञानंप्रतिपादितं॥पाशुपतास्त्र
लाभेनसिद्ध्यार्जुनस्योत्कर्षःशल्यपर्वणियुधिरंपशिभगवतावर्णितः॥अस्मोहिण्योदशाष्टौचतवतेषांचभारत॥ननुत्र्यम्ब
र्जुनस्येहबलेनकुरुनंदन॥सपवसर्वाण्यस्त्राणिदिव्यानिभापशंकरात्॥मत्समोमहिशिष्टोवारणेभवतिपांडव॥द्रोणंभीष्मंकृ
पंकर्णंद्रोणपुत्रंजयद्रथं॥निहंतुंशक्तयात्कुद्धोनिमेषार्द्धादरिंदमः॥सेंद्रासुरंगधर्वान्सयक्षोरगकिन्नरान्॥त्रीन्वालोकान्
विजेतुंहिशक्तिमः किमुतमानुषान्॥विधिनाविहितश्चासोमयासचोदितोपिसन्॥नचकारयविहंतुंकृतांतोबलवत्तरः॥अर्जुनो
हिमहाबाहुर्ममतुल्योमहीपते॥समस्तेश्वरलब्धास्त्रः किंनकुर्याद्विभुःप्रभो॥इतिपाशुपतास्त्रमेवसर्वास्त्रप्रशमनशक्तमितिस
र्वास्त्रसमर्पितिवाभिप्रायेणसर्वाणिप्राप्यशंकरादित्युक्तं॥द्रोणपर्वण्येवशतरुद्रीयेशिवेनयुद्धसमयेकृतंबहुसंहाख्यंप्रतिपादितं॥
आश्वमेधिकपर्वणितदेवयुद्धेकृतंसहाय्यंभीमसेनेनार्जुनंप्रतिस्मारितं॥मोक्षधर्मेचश्रीकृष्णानार्जुनंप्रतिस्मारितं॥सौप्तिकप
र्वणिचयुद्धसमयेपांडवशिबिरंशिवनियुक्तेनकेनचिद्भूतेनसदाशिबिरद्वारिसन्निहितेनसंरक्षितंमितिवर्णितं॥आदिपर्वणिचेंद्रो
पाख्यानेपंचेंद्रान्प्रतियुष्माभिर्मानुषैर्भूत्वा।तत्रशक्रावताररूपसकलदुष्टक्षत्रियवधंकृत्वाशत्रूंजेतव्यमितिनियोगवचनेन

स्वस्यतदीयजयो—सर्वकार्ये धूर्वहत्वमाविष्कृतं ॥ तेदेवत्सर्वमत्रसंगृहीतं ॥ कृष्णाद्यपेक्षयाप्यधिकंशिवस्युधिष्ठिरराज्यस्थि
तिहेतुत्वंशतरुद्रीयाद्युपारव्यानभिरूपमेवकंदतःप्रतिपादयति ॥ प्रत्यक्षमेवभवतानिहता कुरुणांसेनावतस्तेनिहतामयवत्स
तेन ॥ युक्तकिमेतदतिशायियुधिष्ठिरार्थेमूलंत्वदन्यदिहमुग्धशशांकमौले ॥ ८ ॥ शतरुद्रीयाध्यायेसंडनामश्रात्रवाग्निघ्न
शरीरैर्विमलरहं ॥ अयंतोलक्षयेयंतंपुरुषंपातकक्षयं ॥ ज्वलंतंशूलमुद्यम्यपंचादिशंप्रतिपद्यते ॥ तस्यादिशिशीर्यतेशत्रवोमे
महामते ॥ पञ्चानस्पृश्यतेभूमिंनचशूलंविमुंचति ॥ शूलाच्छूलसहस्राणिनिष्पतंत्यस्यतेजसा ॥ तेनभज्जानदीन्सर्वान्मङ्जना
न्मन्यतेजनाः ॥ तेनदग्धानिसैन्यानिपृष्ठतोनुददाम्यहं ॥ भगवंस्तंप्रभावस्वकोवेसपुरुषोत्तम ॥ शूलपाणिंमहान्कृष्णंतेजसासूर्यसं
निभं इत्यर्जुनस्यप्रश्नेप्रजापतिर्नारायणंतेजसाप्रज्वलंविभुं ॥ भुवनंभूर्भुवंदेवंसर्वलोकमहेश्वरं ॥ ईशानंभीश्वरंदेवंदृष्टवानसि
शंकरं ॥ शरण्यंत्र्यंबकंदेवंवरदंप्रभुमीश्वरमित्यारभ्यप्रवृत्तानिव्यासवचनानि ॥ सशिवस्तातेतेजस्वीप्रसन्नोयातितेव्रतः ॥ तस्मिन्
घोरमहारौद्रेसांनाम्येलोमहर्षणे ॥ द्रोणकर्णकृपैर्गुप्तांमहेष्वासैःमहेतिभिः ॥ कस्तांसेनांनरःपार्थमनसापिप्रधर्षयेत् ॥ ऋतेदेवान्
महेष्वासाद्रुद्ररूपान्महेश्वरात् ॥ स्थावुमुह्यतेकश्चिन्नतस्मिन्नव्रतःस्थिते ॥ नहिभूतंसमंतेनत्रिषुलोकेषुविद्यते ॥ गंधेनापिहि
संग्रामेतस्यक्रुद्धस्यशत्रवः ॥ विसंज्ञाभूयिष्ठंपतंतिपतंतिच ॥ तस्मैनमःप्रकुर्वाणादेवास्तिष्ठंतिवेदिवि ॥ येचान्येदानवालोकेयेच ८

स्वर्गजितोनराः ॥ येभक्त्यावरदंदेवंशिवंरुद्रमुमापतिं ॥ इहलोकेसुखंप्राप्यतेयांतिपरमांगतिं ॥ नमःकुरुष्वकौंतेयतस्मैशातायवेसदा
दिनि ॥ भीमसेननायमर्षोहयमेधोद्योगेयुधिष्ठिरंप्रतिस्मारितः ॥ वयंचक्लाःसचास्माकंप्रसीदति ॥ तत्प्रसादादयंराज्यंप्राप्ताः
कौरवनंदन ॥ कस्तांसेनांमहाराजमनसापिप्रधर्षयेत् ॥ द्रोणकर्णकृपैर्गुप्तांमहेष्वासैःमहेतिभिः ॥ ऋतेदेवान्महेष्वासद्रुद्ररूपान्
महेश्वरान् ॥ तस्यैवचप्रसादेननिहताःशत्रवस्त्वयेति ॥ एवमनेकस्थलेषुप्रसिद्धोर्थः ॥ श्लोकेनसंगृहीतः ॥ नन्वर्जुनेनैवतेनिहताः पू
र्वमेवनिमित्तमात्रंभवसव्यसाचिन्इतिसावधारणंभगवद्वचनविरुद्धोयमुक्तोर्थः इत्याशंक्याह ॥ उक्तंमयैवनिहताइतिशौरिणा
यत्तत्रैवतेविजयएवपरंनिरास्यः ॥ सांसशौरिरपियस्यबलेनचक्रेतेषांमहेशतवतस्यकथंनिरासः ॥ ९ ॥ मयैवतेइत्येवकोरणकेन
चभर्जनेभवव्यावर्तनीयः निमित्तमात्रंभवसव्यसाचिन्निति वाक्यशेषात् ॥ तत्रशिवप्रसंगात्प्राप्तात् ॥ किंचश्रीकृष्णस्यपार्थसा
रथ्यंकुर्वतस्तदानींप्रसन्नापन्निवारणमपिशिवप्रसादबलाधानंद्रोणपर्वणिवर्णितं ॥ तत्रहिद्रोणवधानंतरंकृष्णार्जुनयोरक्षो
धनपरितःक्रोशंतीःपरिदृश्यमानकृष्णार्जुनसकलपरिपंथिसैन्यभस्मीकरणमुद्दिश्याश्वत्थाम्नाग्नेयास्त्रेप्रयुक्तेतेनचास्त्रे
णतेथवसगजाश्वरथेसर्वस्मिन्नर्जुनसैन्येभस्मसात्कृतेतन्मध्यलग्नोकृष्णार्जुनावपितेथेवजातावित्यश्वत्थाम्नःसर्वषा
मप्यन्येषांनिश्चयेजातेतदस्त्रशांत्यनंतरं यथापूर्वरथेनभ्राजमानोदृष्ट्वाचिंताशोकपरिताधिकृत्वास्त्रमाहात्म्यं शास्त्रमित्येतिर

धादवकृत्वरणाजिरास्तहुतं यदृच्छयातत्रसमागतंवेदव्यासंदृष्ट्वेतमभिवाद्य ॥ नाकरामरगंधर्वानपिशाचानराक्षसाः ॥ ननागयक्षपतगानमनुष्याः कथंचन ॥ उत्सहेवेन्यथाकर्तुंमेतदस्त्रंमयेरितं ॥ तदिमांकेवलंहतापकामक्षौहिणींज्वलत् ॥ कथंमानुषधर्माणोनधाक्षीत्केशवार्जुना विति पृष्टवंतंभरत्यभानंप्रतिवेदव्यासेन ॥ महांतमेवमर्थंमांयंत्वंपृच्छसिसंशयात् ॥ तन्तेहंसंभवंख्यामिसमाधायमनंशृणु ॥ योसौनारायणोदेवःसर्वेषामपिपूर्वजः ॥ आदिदेवोजगन्नाथोलोककर्तास्वयंप्रभुः ॥ आद्यःसर्वस्यलोकस्यअनादिनिधनोऽच्युतः ॥ व्याकुर्वंतेयस्यतत्त्वंश्रुतयोमुनयश्चह ॥ अजोजय्यः सर्वभूतैर्मनसापिजगत्पतिः ॥ तस्माद्दिमंजेतुमिच्छन्नज्ञानतमसावृतः ॥ माहरुचःपुरुषव्याघ्रविद्धिनहृदिहार्जुनयोर्जेतुमशक्यत्वंमुक्त्वानंतरंसविशेषंतत्कारणमुक्तंनारायणस्यांशभूतेनवर्षाणांषष्टिसहस्राणिषष्टिशतानिचमेनाकेतपस्तप्त्वापुनर्द्वितीयवारंतृतीयवारंचतपस्तप्त्वातत्कृतसन्निधानंशिवंबहुधास्तुत्वाभक्तंहिमांभजमानंभजस्वेतिप्रार्थनापूर्वकमितरदुर्लभावहोवरःप्रार्थितस्तेचवरास्तस्मैशिवेन ॥ मय्यसादान्मनुष्येषुदेवगंधर्वयोनिषु ॥ अप्रमेयबलात्मात्वंनारायणभविष्यसि ॥ नचतांसमहिष्यंतिदेवासुरमहोरगाः ॥ नपिशाचानगंधर्वाननरानत्वराक्षसाः ॥ नसुपर्णास्तथानागानविश्वाविश्वेयोनयः ॥ नकश्चित्तावद्देवोपिसमरेषुविजेष्यति ॥ नचशस्त्रेणचास्त्रेणनाग्निनानचवारिणा ॥ नवज्रेणनशुष्केणचेरणस्त्रावेरणच ॥ नहस्तेननपादेननकाष्ठेननलोष्टना ॥ कश्चि ६

न्तवकृजःकर्तामत्प्रसादाल्लप्स्यंचन ॥ अपिचेत्समरंप्राप्यभविष्यसिममाधिकइत्येवंदत्ताइति ॥ तदनंतरंव्यासेनएवमादीन्वरान्लब्ध्वाप्रसादावशूलिनः ॥ सएषदेवश्चरतिमाययामोहयन्जगत् ॥ तस्यैवतपसाजातोनरोनाममहामुनिः ॥ तुल्यलक्षणदेवेनतजानीत्यर्जुनंत्वदेतिचसएवनारायणः कृष्णारूपेणावतीर्णइतितस्यैवतपसातत्तुल्यमहिमतांप्राप्तोनरोप्यर्जुनरूपेणावतीर्णइतिचोपदिष्टं ॥ अत्रकृष्णार्जुनयोराग्नेयास्त्रानभिभूतत्वेनाग्निनानचवारिणेत्यत्राशिववरदानैंकारणमितिस्पष्टमेवोक्तं ॥ सौषुप्तिकपर्वणिचकृष्णानारायणप्रीतेनशिवेनकृष्णकृतपांडवसहाय्यकनिर्वाहार्थंपांडवशिबिरसंरक्षणंकारितमितिवर्णितं ॥ तत्रलोकैर्मुक्तं अश्वत्थाम्नादुर्योधनवधानंतरंमतिक्रुद्धेनपांडवपांचालसहितसकलपांडवशिबिरसक्षयंकरिष्यइतिसंकल्प्यरात्रौतदीयशिबिरद्वारंगतेनमहद्भूतंप्रतिभयंकरंरौद्राकारंसहस्रनयनंदृष्ट्वातमश्वत्थाम्नाविसृष्टानिसर्वाण्यस्त्राण्यायुधानिचतेननिगीर्णानितताश्चिंताकुलेद्रौण्यपेतदाप्लिस्तारार्यंशिवंप्रपत्स्यइतिसंकल्प्यतदर्थमुत्साहमानेतस्यपुरस्तात्पर्वताकारमहतीवेदिंप्रादुर्बभूवतातस्यांज्वालामालाजटिलोमहानग्निःप्रादुर्भूतःततःसंख्यावीताभूतप्रमथरुद्राःशतघोरूपाःनानाविधायुधवाद्यादिधराःप्रादुर्भूतास्ततस्तेत्वाम्नावात्मानमुपहारंनिवेद्यशिवंत्राणायामीतिनिश्चित्यमंत्रेणस्वात्मानंहविर्निवेद्यार्धदीप्तवह्निंअविशेततःप्रादुर्भूतःशिवस्तंपति ॥ सत्यशौचार्जवत्यागैस्तपसानियमेनच ॥ स्तोत्राभक्त्यान्नधृत्याचकर्मणामनसागिरा ॥

यथावदहमाराध्यः कृष्णानाक्लिष्टकर्मणा॥तस्मादिष्टतमः कृष्णादन्योममनविद्यते॥कुर्वतातस्यसन्मानंतांचजिज्ञासतामया॥
पांचाल्यःसर्वयागुप्तामायाश्चबहुशःकृताः॥कृतस्तस्यैषसन्मानःपांचालारक्षितामया॥अभिभूताश्चकालेननैषामद्यास्तिजीवनमित्यवोचमिति॥अत्रकृष्णाकृतसमाराधनप्रीतेनशिवेनकृष्णाप्रतिज्ञानिर्वाहार्थंमयंपांचालादिसंरक्षणमेतावत्यर्थंनकृतमितिस्पष्टमेव॥एतदपिकृष्णःस्वभक्तइतिनहुमानात्कृतमित्येतदतितरांस्पष्टयितुमेवशिवरहस्यप्राकट्यस्वभूतस्यनयनादिनिर्गताविभ्यःसंख्याताताभीकृष्णानांप्रादुर्भावउक्तःनतद्रूपंसत्यमवक्तुंदृष्टमेवचा॥सर्वथाचतदालोक्यस्फुटेयुरपिपर्वताः॥तस्यस्यान्निशिकायाश्चश्रवणाभ्यांचभारत।तेभ्यश्चाक्षिसहस्रेभ्यःप्रादुरासन्महाहयः॥वथातेजोमरिचिभ्यःशंखचक्रगदाधराः॥प्रादुरासन्हृषीकेशाःशतशोथसहस्रशइतिएवंयत्तस्मादाकृष्णोनापिपांडवानांसहाय्यंकृतंतस्यमयैवैतेनिहताइत्येवकारेणव्यावर्त्तनमत्यंतंमनुचितंमित्यर्जुनमात्रव्यावर्त्तनंतदर्थइतिअकोमनापिस्वीकरणीयमितिभावः॥एवंमयैवैतेनिहताइत्यस्यकृष्णावाक्यतयंगीकृत्यावधारणस्यगतिरुक्ता॥वस्तुतःशिववाक्यमेवतदितिपरिहारोत्तरमाह॥यद्यद्दर्शितवताहरिणात्योक्तंतद्विश्वरूपंमपितावकमेवमन्ये॥पार्थायनाथितवतेपररूपमिष्टंतेनत्रिलोचनतरेवहिदर्शनीयं॥१०॥विश्वरूपंधरताहिकृष्णेनतद्वचनमुक्तंअतस्तद्रूपंयदीयंतस्यैवतद्वचनमितियुक्तं॥त ७

त्स्वशैवंरूपमितिपूर्वापरलोचनयावसीयते।तथाहिईहैकस्थंजगत्कृत्स्नंपश्याद्यसचराचरं॥ममदेहेगुडाकेशयच्चान्यद्द्रष्टुमिच्छसीतिश्लोकेनममविश्वात्मकंरूपंद्रष्टुमिच्छसिचेत्तरयेत्यर्जुनेनपृष्टस्योत्तरमुक्तंयच्चान्यद्द्रष्टुमिच्छसीतिभगवतोक्तंतस्यायमर्थः॥यच्चान्यज्जयपराजयादिकंयच्छंकसेयद्वाजयेमयदिवानोजयेयुरितिपरदेवत्वंतदपिद्रष्टुमिच्छसिचेत्पश्येतितेनदुर्योधनादिसंहर्तृसंहारप्रदर्शनरूपंदर्शयामीतिभगवतासूचितंतथाभूतमेवत्वरूपंतेनदर्शितं॥तंदृष्ट्वार्जुनेनतदनुवादःकृतःअमीचत्वांधृतराष्ट्रस्यपुत्राःसर्वेसहैवावनिपालसंघैः॥भीष्मोद्रोणःसूतपुत्रस्तथासौसहास्मदीयैरपियोधमुख्यैः॥वक्त्राणितेत्वरमाणाविशंतिदंष्ट्राकरालानिभयानकानि॥केचिद्विलग्नादशनांतरेषुसंदृश्यंतेचूर्णितैरुत्तमांगैः॥लेलिह्यसेग्रसमानःसमंतात्लोकान्समग्रान्वदनैर्ज्वलद्भिः॥तेजोभिरापूर्यजगत्समग्रंभासस्तवोग्राःप्रतपंतिविष्णोः॥इतितदनंतरमर्जुनेनजगत्संरक्षकस्यविष्णोस्तवनंभवतीदंसकलजगत्संहारकमतिघोररूपंकिमार्यरूपंत्वयाप्रदर्शितमित्यभिप्रायेणाख्याहिमेकोभवानुग्ररूपोनमोस्तुतेदेववरप्रसीदेति॥विज्ञातुमिच्छामिभवंतमाद्यंनहिप्रजानामितवप्रवृत्तिमितिपृष्टेन हि भगवतासकलसंहर्तृकालाग्निरुद्ररूपंमयाप्रदर्शितमित्युक्तंकालोस्मिलोकक्षयकृत्प्रवृद्धोलोकान्समाहर्तुमिहप्रवृत्तः॥ऋतेपित्वांनभविष्यंतिसर्वेयेवस्थिताःप्रत्यनीकेषुयोधाइत्यतोजगत्संहारार्थेकालाग्निरुद्रमूर्त्तिंदधानस्यशिवस्यैवेदंरूपमित्युक्तं॥

ननुकृष्णानशैवंरूपंप्रदर्शितमितिकथमुपपद्यतांद्रष्टुमिच्छामितेरूपैश्वरंपुरुषोत्तमेत्फर्जुनेनतदीयमेश्वर
रूपंप्रदर्शनीयमितिप्रार्थितं॥उच्यतेनत्प्रार्थनानुसारेणयेदेववस्कृतःकृष्णस्यसर्वतोप्यायंरूपंतदेवहिप्रदर्शनीयंतच्चवस्तु
तोवैष्णवरूपस्याप्यादिभूतंमूलंशैवमेवरूपंमितितत्प्रदर्शनेकानुपपत्तिःयदितुकृष्णस्यशिवाभेदोनेष्यतेतदाप्यनुपपत्तिः
॥अर्जुनेनखलुसर्वात्मकमाद्यमैश्वररूपंप्रदर्शनीयमितिपृष्टंत्तवस्कृतःशैवमेवरूपमित्यभिप्रेत्ययोगमाहात्म्यात्कृ
ष्णेनतत्प्रदर्शितंमित्युपपद्यते॥ननुमांशक्यसेद्रष्टुमनेनैवस्वचक्षुषा॥दिव्यंददामितेचक्षुःपश्ययोगमैश्वरमितिकरिष्यमा
णारूपप्रदर्शनस्यैश्वरविषयस्वकीययोगशक्त्यातिशयरूपत्वस्यकृष्णेनैवोक्तत्वात्॥यद्येवंएतच्छ्रुत्वावचनंकेशवस्येत्यादि
संदर्भेभिहितस्यार्जुनस्यमानिकृष्णंप्रतिवचनानितानिकथमुपपद्यतांतानिहिकृष्णस्तुतिवचनानिप्राचीनस्वापराधसह
नप्रार्थनासहितानिकृष्णस्यैवतद्रूपांतरत्वेनदृष्ट्वेत्यर्जुनस्यायंगमयंतीतिचेत्। यद्यभेदस्तदानकाचिदनुपपत्तिः यदिस
नेष्यतेतदाप्येवंभूतशिवयोगनिष्ठत्वरूपमाहात्म्यातिशयदर्शनेनस्तुत्यादिकमित्युच्यतेःतदंतरमपिमयाप्रसन्नेनतवार्जुने
दंरूपंपरंदर्शितमात्मयोगादितिभगवतातस्यविश्वरूपप्रदर्शनस्ययोगप्रभावप्रयुक्ततादर्शनात्॥गीतासूक्वचित्कृष्णानम
दीयरूपमित्सूक्वचिद्योगप्रभावप्रदर्शितमैश्वंरूपमित्युक्तं॥क्वचिदपरिब्रह्मलिंगमहिमवर्णनं॥सर्ववित्प्रत्याहमित्संकृत्व ८

मेकांशेनस्थितोजगदित्यादिगीतैरहंमादिशब्दैरर्शितं॥क्वचिच्चतमेवचाद्यंपुरुषंप्रपद्ये॥योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः॥
ईश्वरःसर्वभूतानांहृद्देशेर्जुनतिष्ठति॥भ्रामयन्सर्वभूतानियंत्रारूढानिमायया॥तमेवशरणंगच्छसर्वभावेनभारतेत्यादावी
श्वरनामाभिधेयशिवविषयमहिमवर्णनंनतत्सर्वमितिव्यंजितमिवचलक्ष्यते॥किमभिप्रायागीतासूभगवत्सूक्वयइतिसंदिहाने
नार्जुनेनानुगीतावतोरपुनःपृष्टस्यभगवतोनशक्यंतन्मयाभूयस्तथावक्तुमशेषतः॥परंहिब्रह्मक्वचितंयोगयुक्तेनतन्मयेतिवचन
दर्शनाच्चतस्मात्सर्वथाकृष्णस्यशिवाभेदेनशिवयोगस्यामर्थ्यलब्धाशिवाहंभावनयाशिवरूपप्रदर्शनेनकाचिदनुपपत्तिः॥
भगवताशैवमेवरूपंप्रदर्शितमित्यत्रगमकांतरमाहयुक्तंचैतदतएवहिमोक्षधर्मेतेनार्जुनंप्रतिनिजंवपुरास्थितेन॥देवनतेन
निहतान्हतवानसीतित्येवतद्वचनपर्यवसानमुक्तं॥निहतांस्तेनपूर्वंहतवानभिरोचसे॥अथमेयप्रभावंत्वंदेवदेवमु
मापतिं॥भजस्वनित्यंप्रयतोविश्वेशंहरमव्ययमितिकृष्णस्यार्जुनंप्रतिवचनं॥अनेनशब्दतोर्थतश्चमेयेवेतेनिहताइतिवचनम
पिशिवस्येववचनमितिस्वरूपमास्थितेनश्रीकृष्णेनैवस्पष्टीकृतं॥तत्रचशिववचनंपूर्वमेवनिहताइत्यस्यायमभिप्रायः॥यद्वा
नारायणसन्निधौपंचेद्रान्प्रतिमयोक्तंएषाभार्याभवितावोनसंशयः॥यानिंसर्वेमानुषींसंविशाध्वं॥तन्नयूयंकर्मकृत्वाविषत्यं
बहूनन्यान्निधनंप्रापयित्वा॥शस्त्रैर्दिव्यैर्मानुषान्व्याधयित्वाशरान्सर्वान्नाहवेतान्विजित्य॥आगंतारःपुनरेवंद्रलोकंस्वकर्म

णापूज्यतमंमहार्हमिति ॥ तैरेवैते निहताइतिऋषीणांपुनराद्यानांवाचमर्थोनुवर्त्ततइतिऋषीणांमाहात्म्यमवगच्छंतोवदंति॥कि
मुक्तंकृष्णंविश्वाधिकोरुद्रोमहर्षिरितिप्रसिद्धस्यमहर्षयः शिवस्यवचनंतथैवार्थफलतीतिएवमभिप्रायकल्पनएवपूर्वमेवे
त्यस्यसर्वपूर्वभाविविषतयासामंजस्यं भवतिनतुकृष्णस्यवाक्यतेनारायणस्यकृष्णरूपेणावतीर्यपांडवसहाय्यंकार्यमि
तिसकल्पस्याप्युत्तरतशिववचनानंतरसमुदितत्वेआदिपर्वणिपंचेंद्रोपाख्यानेएववर्णितत्वात्॥तस्मादुदात्तनयोश
धर्मवचनानुसारेणपूर्वमेवैतेनिहताइत्यादिशाववाक्यंतद्रुद्रविश्वरूपविग्रहश्चशैवए
वेतियुक्तं।गीतास्वन्यत्रचतत्रतत्रविश्वरूपविग्रहस्यकृष्णेनयत्स्वकीयत्वंव्यवहृतंतत्सर्वस्याभेदेनशिवाहंभावभावनया
वाउपपत्तेः।इतोप्येवमित्याह॥प्रागुक्तसर्वमहिमोपचितंहितत्र रूपंपरंशिवदिदृक्षतमर्जुनेन॥गीतोदितश्चमहिमास्तकलो
पिनायस्पष्टंत्वदीयइतिकोर्मगिरामतिमह॥१२॥ विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदित्यादिनाविश्वरूपा ध्यायाध्याय
गवतायावान्महिमावर्णितस्तावदुपचितंहिरूपं——मित्यर्जुनस्यप्रार्थ्यमानस्यभवाप्ययौहिभूतानांश्रुतौविस्तरशोमया
॥त्वत्तःकमलपत्राक्षमाहात्म्यमपिचाव्ययं॥एवमेनंयथात्थत्वमात्मानंपरमेश्वर॥द्रष्टुमिच्छामितेरूपमैश्वरंपुरुषोत्तमेति
तद्वचनात्प्रागुक्तःपश्चाद्दृश्यमाणश्चसर्वोपिपरभावस्तूक्तोमहिमाशिवएवेतिकूर्मपुराणेवचनैरवगम्यते॥तत्रस्वल्वा

श्वरगीतायांशिवस्यसकलमहिमानंशिवेनैवसनत्कुमारादिभ्यउपदिश्यवर्णयिताश्रीवेदव्यासेनतद्वसानेकथितंसनत्कुमा
रोभगवान्संवर्तायमहामुनिः॥दत्तवानेश्वरंज्ञानंसोपिसत्यवतायतु।सनंदनोपियोगींद्रःपुलस्तायमहर्षये॥प्रदद्यौगोतमा
याथपुलहोपिप्रजापतिः॥अंगिरावेदविदुषेप्रहाजायस्तवानू॥जैगीषव्यायकपिलस्तथापंचशिखायतु॥पराशरोपिसनका
त्तितोमसर्वतत्त्वविद्॥लेभेनतपरंज्ञानंतस्माद्वाल्मीकिरभवत्॥मामुवाचपुरादेवःसविदेहभवांगजः॥चामदेवोमहायोगीरु
द्रःकिलपिनाकधृक्॥नारायणोपिभगवान्देवकीतनयोहरिः॥अर्जुनायस्वयंसाक्षादत्तवानिदमुत्तमं॥यदाहंलब्धवान्रु
द्राद्वामदेवादनुत्तमं॥विशेषाद्विरिशंभक्तिस्तस्माद्वारभमेभवदित्येवमर्जुनंप्रतिव्यासेनकथितंभिक्षुकूर्मपुराणएववचनं
॥ज्ञानंतद्देश्वरंदिव्यंयथावद्विदितंतया।स्वयमेवत्वषीकेशःप्रीत्योवाचसचात्मनं॥गच्छगच्छस्वकंस्थानंनशोकंकर्तुमर्हसि॥
भजत्वंपरयाभक्त्याशरण्यंशरणंशिवमितितस्माद्भगवद्गीतायाईश्वरगीतार्थानुवादरूपत्वात्तदर्थ एवपर्यवसानंयु
क्तमित्यर्थः॥मूलभूतेश्वरगीतार्थालोचनयाग्रंथपरिसमाप्तौर्जुनव्यवहारपर्यालोचनयाचभगवद्गीतायाःशिवपरत्वमुप
पादयति।गीतासूपच्छरणमीश्वरमेवकुर्वित्युक्तेरुद्रतनयंप्रतिमाधवेनोक्तत्वाकरिष्यइतिनतयेवपूजायाश्चव्यतन्य
नैततोपितथाप्रतीतेः॥१३॥भगवद्गीतासूईश्वरःसर्वभूतानांहृद्देशेर्जुनतिष्ठति॥भ्रामयन्सर्वभूतानियंत्रारूढानि

मायया ॥ तमेवशरणंगच्छसर्वभावेनभारत ॥ तत्प्रसादात्परांशांतिंस्थानंप्राप्स्यसिशाश्वतमितियद्भगवतोपदिष्टंतत्तमेव
चाद्यंपुरुषंप्रपद्येयतःप्रवृत्तिःप्रसृतापुराणीतिभगवतास्वेनापिक्रियमाणंयदीश्वरप्रपदनंतद्विषयमेवकथमवगम्यते ॥ तमेव
चाद्यमित्यत्रकंपुरुषमित्याकांक्षायामुत्तमःपुरुषस्तन्यः परमात्मात्युत्तमः ॥ योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरइतिस्म
र्तीपादनीयेपुरुषेशिवसाधारण्येश्वरनाम्नःप्रायेणतत्रतस्यैवेश्वरः सर्वभूतानामित्यत्रापिश्रवणात्यत्तूत्तमः पुरुषस्तन्यइति
श्लोकानंतरंयस्मात् क्षरमतीतोहमक्षरादपिचोत्तमः ॥ अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमइतिभगवताक्षराक्षरातीतत्व
नस्यस्यापिताभ्यामुत्तमत्वमुक्तंतदीश्वराभेदात्तद्विषयैवायंगद्योपपादनीयं ॥ पुरुषोत्तमनामधेयोत्यथमश्नुतेश्वरनामोक्तत्व
त्वत्तमाप्राधान्येनानुसोध्यत्वात् ॥ स्थितोस्मिगतसंदेहःकरिष्येवचनंतवेतिप्रतिज्ञातवानर्जुनोयावज्जीवंशिवपूजादिविधय
एवावर्त्ततेतेनापिगीतासुशिवएवकृष्णेनसकलपरमावलिंगमहिमाशालित्वेनमुमुक्षुभिःशरणीकरणीयतेनचोपदिष्टइ
त्यवसीयतेएतेनतमेवशरणंगच्छेत्याद्यनंतरंसर्वगुह्यतमंभूयःशृणुमेपरमंवचइत्फपक्रम्यसर्वधर्मान्परित्यज्यमामेकंश
रणंव्रजेतिभद्दुपदिष्टंतद्विषयंतदनंतरंकरिष्येवचनंतवेतितत्प्रतिवचनमित्यपिशंकानिरस्ता ॥ तयासतिशिवपूजांपरित्यज्य
विष्णुपूजायाएवार्जुनेनकर्त्तव्यतापत्तेः ॥ यावज्जीवंतेनशिवपूजैवकृतानतुविष्णुपूजायन्तुशिवस्यरात्रिकर्त्तव्यनित्यपूजार्थं

DELHI UNIVERSITY MEMORIAL

कृष्णःसर्वेष्युपहारःकृष्णोसमर्पितइतिवचनंतदपिकृष्णमूर्त्तौशिवादिभावोस्तीतिशिवार्चनबुध्येत्येतदभिप्रायमतएवकृष्णा
र्जुनयोःकैलासगमनेसर्वोपुपहारःशिवसमीपेदत्तोर्जुनेनेत्युक्तंचोपहारंसततोनैशंनैत्यकमात्मनः । ददर्शत्र्यंबकाभ्याशे
वासुदेवनिवेदितंमिति । यद्यपिअत्रगीतामयासृष्टगिरःसत्यामहीयते । दर्शितंममसर्वस्वंतेनासौहृतवान्निपूनितिपुधिष्ठिरं
प्रतिकृष्णवचनानुसोरणकरिष्येवचनंतवेतिवचनंयुद्धमात्रविषयंस्यात् ॥ तथापि ॥ अनन्याश्चिंतयंतोमांयेजनाः । मामेवंश
रणंव्रज । अंतवंतुफलंतेषांतद्भवत्यल्पमेधसमित्यादि ॥ भगवद्वचनंश्रुतवताप्यर्जुनेनत्रदेवतांतरंपरित्यज्यशिवपूजनमेवकृत
मित्यत्रनास्तिविवादः ॥ अतोगीतासुस्वननित्यपूज्यमानस्यशिवस्यैवमहिमोपदिष्ट इतिनिश्चयोस्तीतिकल्पनायं ॥ अनुगीता
वतारप्रस्तावानुसोरणगीताश्रवणसमयेसंशयकल्पंज्ञानेअनुगीताश्रवणानंतरंदृढनिश्चयइतिवाकल्पनीयं ॥ तस्मात्कृ
ष्णाद्ब्रह्मण्येभ्यश्चातिशयेनपांडवसंज्ञैरेकतान्मूलंकृष्णाब्रह्मलक्ष्यत्रमूलत्वेनतद्ब्रह्मणमावश्यकमितितत्रनिरूपपदंशिव
एवपरंब्रह्मेतिव्यंजयितुंतस्मिन्निरूपपदंतद्ब्रह्मपदंप्रयुक्तमित्येतद्व्यलेपायते ॥ एवंनिरूपमंशिवएवपरंब्रह्मेतिव्यंजयितुंत
स्मिन्निरूपपदंतद्ब्रह्मपदं प्रयुक्तमित्येतद्व्यलेपायते ॥ ॥ एवंनिरूपदंशिवंब्रह्मपदंप्रयुंजानेनश्रीवेदव्यासेनशिवस्यपरब्रह्मभा
वोव्यंजितइतिसमर्थितं ॥ अथकठवल्लीमंत्रब्रह्मपरविर्णयायशिवाभिधानश्रुतिमंत्रहेतुकुर्वतापितेनसव्यंजितइतिदर्शय

ति ॥ अंगुष्ठमात्रमधिसूत्रणंपुमान्संब्रह्मेतियस्मुकगुरुः सविनिर्णिनाय ॥ ईशानइत्यभिधायतयिकुलरूढ्यात्वांब्रह्मतेनच शिवस्फुट्यांचकार॥१४॥ कठवल्लीषुपठते ॥ अंगुष्ठमात्रः पुरुषोमध्य आत्मनितिष्ठति ॥ इशोभूतभव्यस्यनततोविजुगुप्सतइतियोंगुष्ठमात्रःपुरुषःतमीशानंविदित्वातदनंतरंनविजुगुप्सतेआत्मानंगोपायितुंनेच्छति अतयंप्राप्तत्वादित्येवंविदित्येत्यध्याहारेणमंत्रार्थोवर्णनीयः॥अंगुष्ठमात्रःपुरुषोज्योतिरिवाधूमकः॥ ईशानोभूतभव्यस्यसएवाद्यसदुश्व इत्यादीनिचमंत्रांतराणिपठितानि॥तत्रब्रह्ममीमांसायामंगुष्ठमात्रःपुरुषोजावःपाशछन्नयोरमाणत्वात्इतिपूर्वपक्षेभिहंतितदा क्षेपेवभमितइत्यधिकरणेप्रमितः अंगुष्ठप्रमितःपरमात्माशब्दात्परब्रह्माभिधानश्रुतिरूपादीशानशब्दादेवेति आत्मामीशानशब्दयोगोपस्थितमैश्वर्यलिंगंप्रथमाच्छ्रीधावगतादीशानशब्दादेवप्रतितःपरमात्मेतिनिर्णेतुंशक्यमित्येवकारार्थः॥ नचभूतभव्यस्येत्यैश्वर्यसतियोग्युपादानात्केवलमैश्वर्यरूपलिंगंसमर्थकएवायमीशानशब्दोनतुदेवताविशेषसमर्पकोमीतिशंकनीयं॥प्रतियोगिविशेषोपादानेपीशानशब्देनकृतयारूढ्यादेवताविशेषोपस्थितेरनिवार्यत्वात्॥तदेतत्सर्वाभिः शिवतत्त्वविवेकादिषुप्रपंचेनोपपादितं॥अपरिछिन्नस्यापिपरमेश्वरस्यांगुष्ठमात्रलंतद्धृदयकमलावछिन्नत्वेनलिंगरूपतयोपपद्यते॥अतएवहंसोपनिषदित्तद्धृदयकमलावछिन्नस्यपरब्रह्मणोलिंगरूपतमुक्तं॥एषोसोपरमहंसोभानुकोटिप्र ११

तीकाशोयोनेदंव्याप्तंतस्याष्टधात्मतिर्भवतिपूर्वदलेषुपुण्यमतिर्गुत्तेयनिद्रालस्याद्योभवंतियाम्येक्रौर्यमतिःनैर्ऋतेपापमतीपावारुण्यांक्रीडावायव्येगमनादोबुद्धिःसौम्येरतिप्रीतिःऐशानेद्रव्यादानंमध्येवैराग्यंकेसरेजाग्रद्वस्थाकर्णिकायांस्वप्नःलिंगेसुषुप्तिरित्यादिनातद्धृदयकमलावछिन्नेब्रह्मणिखलुजीवस्यसुषुप्तिःसकलश्रुतिप्रसिद्धातद्भावेनाडीषुतच्छेनआत्मनिचैत्यधिकरणसमर्थिता॥अतोब्रह्मणिसुषुप्तिरितिवक्तव्येलिंगेसुषुप्तिरितिवक्तव्येलिंगेसुषुप्तिरितियदुक्तंतेनज्ञायतेतद्धृदयकमलावछिन्नंतत्तदंगुष्ठपरिमाणलिंगाकारतयोपासनीयंब्रह्मश्रुत्याविवक्षितमितिवामनपुराणेपिदेवान्प्रतिविष्णुनातद्धृदयकमलस्थस्येश्वरस्यलिंगरूपत्वमुक्तं॥ततोव्ययात्माहरिस्तद्धृत्पंकजवासिनं॥दर्शयामासदेव्यनांमुरारिर्लिंगमीश्वरमिति॥एवंश्रुतिपुराणेतिहासन्यायसूत्रपर्यालोचनयालब्धानिशिवस्यपरब्रह्मभावसाधकानिदर्शितानि॥अथतत्रबालिशप्रलपितानिबाधकान्युद्धर्तुंप्रतिजानीते।एवंप्रमाणपरिशुद्धिकयाविशंकंब्रह्मत्वमित्यवधृतेपिजले धरोरे॥आरोपितेत्वयिपरंजनादिदोषैस्त्वंब्रह्मनेतिववतःप्रतिबोधयामः॥१५॥तत्रप्रदर्शितजननादिदोषसकलसाधारणपरिहारमाह॥कल्पादिषुद्रुहिणकेशवरुद्ररूपैस्त्वत्तस्त्वमेवभगवन्प्रविभागभाय॥तैरेवतेषुविषमाक्षपरस्परस्मद्रादिर्भवंर्ननुकरोषिजयैषिवृत्तिं॥१६॥त्रिमूर्त्यजीर्णस्यश्रीसांबशिवस्यनकुतोपिजननंनतामसत्वं॥नपारुषपवरणंनबाणासुरयुद्धादिकंकिंतुसंहाररुद्रतदंशभेदरू

पाणांश्रासांबशिवविभूतिविशेषाणामेवंतेषामपिनियमेवब्रह्मणोनारायणाच्चनिकर्षः किंतुक्वचिद्ब्रह्मणः क्वचिन्नारायणस्यक्वचित्तेषामपीतिकल्पादिभेदेनव्यवस्थितः॥ तदेच्छिवपुराणेवायुसंहितायांत्रयस्तेकारणात्मानोजाताःसाक्षान्महेश्वरइत्युपक्रम्य स्पष्टमुक्तंतपसातोषयित्वातंपितरंपरमेश्वरं॥ ब्रह्मनारायणौपूर्वंरुद्रः कल्पांतरेऽसृजत्॥ कल्पांतरेपुनर्ब्रह्मारुद्रविष्णुजगन्मयः।विष्णुश्चभगवांस्तद्वद्ब्रह्माणमसृजत्पुनः॥ नारायणंपुनर्ब्रह्माब्रह्माणंचपुनर्भवः॥एवंकल्पेषुब्रह्मविष्णुमहेश्वराः। परस्परस्माज्जायंतेपरस्परजयैषिणः॥ तत्तत्कल्पांतवृत्तांतमधिकल्पमहर्षिभिः॥ प्रभावःकथ्यतेतेषांपरस्परसमुद्भवादिति॥ तत्तत्कल्पांतवृत्तांतमधिकृत्यमहर्षिभिः॥ तानितानिप्रणीतानिविद्ध्यस्तवनमुत्यति॥ अयंपरस्त्वयंनेतिसंरंभाभिनिवेशिनः॥ यातुधानाभवंत्येवपिशाचाश्वनसंशयइतिच॥ कर्मविपाकशास्त्रेपिपरमेश्वरांशभूतानांतेषांभेदसाधनेदोषानुक्ताः॥ये ब्रह्मविष्णुरुद्राणांभेदउत्तमभावतः॥ साधयेदुर्व्याधियुक्तोभवतिमानवइतिएवंपरमार्थिकं परिहारमुक्त्वासाक्षात्सांबशिवस्यैवब्रह्मणोनारायणस्यचललाटाज्जननमभ्युपेत्य तस्यलोकत्रयेणदोषत्वाभावमाह।देवत्वमेवनिटिलाद्यदिविष्णुविधोराविर्बभूविथततस्तवकोनिकर्षः॥ नासापुटात्तहिविधेर्नचतस्यपौत्राज्जातोसिविष्णुरिवनापिमनुष्यमात्रात्॥१७॥ नास्त्येवतेपुरुषवीर्यकणानुशक्तिर्नस्त्रीणगर्भवसतिर्नचयोनिजत्वं॥ व्यक्त्यापरंकचनतेशिवपद्यवद्यमेतैः कियत्तवलुविप्रो १२

नभवत्मुरारेः॥१८॥ अभ्यर्थनोपगमपूर्वमकर्मवश्यमावेदयद्भिरवतारभिमंसमस्तं॥ पौराणिकैः प्रकटितापरिहारशक्तिर्विश्वेशहंतविदितातिदितारवल्लानां॥१९॥ ब्रह्मणोनारायणस्यचापिमुक्तोपासनास्थानत्वेनातिपदिश्यमानेऽस्मिन्प्रकृतेशिवस्यतनुनारायणस्यैवब्रह्मणोनासापुटात्तथोत्पत्त्यपन्मनुष्यमात्राद्वाजननं।शिवस्यप्रादुर्भावेचकविहपिनारायणस्यैवनपुरुषवीर्योत्पत्तिप्रदेशः नस्त्रीगर्भवासः॥ नचतयोर्निप्रभवत्वंकथंचिदभिव्यक्तिर्भीत्रेणपद्यवद्यमापद्येत एतैःषड्भिर्हेतुभिर्नारायणस्यकिंपदस्यभाषद्येतात्॥ शिवस्याभिव्यक्तिर्मानवजननेदोषत्वेनोद्घाटयद्भिर्बालिशैर्नारायणस्यैवतत्तदितरासाधारणंतस्याह॥ एवंकृष्णावतारेयोमुरव्यजन्मिमहाभारतस्यशोकमाहमीत्यादिनारदवाक्यस्यतत्रतत्रपर्यालोचिततत्पातेनापितदुपोद्घाटितंस्यात्। यदिमन्येरन्ब्रह्मरुद्रार्थितस्यविघोरकर्मवश्योयंसर्वोप्यवतारःकेवलंछायापरिग्रहमानुषभावादिनटनार्थःशोकमोहाद्यभिनयइति॥ इत्थंकृतोऽवगम्यतेपुराणवर्त्मनेत्यादिनेन। तस्मादेवंननुशिवस्यापितत्रतत्राभिव्यक्तिर्ब्रह्मरुद्रार्थितस्यैवस्वेच्छाधीनावगम्यते॥ तत्रचालिशैः किंचिद्दिदृक्षमिपकिंचिदविदितंभिवव्यवहियतइतिनेदं विद्वत्कृत्यमितिभावः॥ तत्रादिवराहरूपस्यविष्णोर्ब्रह्मनासापुटाज्जन्मिभगवतेदर्शितं॥ इत्यभिप्रायतोनासाविवरात्तद्देहोमेनघ॥वराहतोकोनिरगादंगुष्ठपरिमाणतः॥ तस्याभिपश्यतःस्वस्थःक्षणेनकिलवारितः॥ गजमात्रंभवतेवेतदद्भुतमभून्महद्

दितिवारितः यत्रभूर्निमग्नाततःप्रलयाब्धिजलादित्यर्थः विष्णो।पुरुषवीर्यानुप्रवेशस्ततस्त्रीगर्भेवासस्तद्योनिप्रभूतंचप्र
गवतएववामनावतारोदर्शितः। अदितिर्दुग्धंलब्ध्वाहरेर्जन्मात्मनिप्रभोः॥ उपधावत्पतिंभक्त्यापरयाकृतकृत्यवत्॥ एवम
माधियोगेनकश्यपस्तद्बुध्यत॥ प्रविष्टमात्मनिहरेरंशंत्यक्तितथेक्षणः॥ सोदित्यांवीर्यमाधत्ततपसाचिरसंभृतं॥ तमाहि
तमनाराजन्दारुण्यग्निरिवानलः॥ अदितेतानिहितेगर्भेभगवंतंसनातनं॥ हिरण्यगर्भोविज्ञायसमीडेगुह्यनामभिः॥ इत्थं
विरिंचस्तुतकर्मवीर्यःप्रादुर्बभूवामृततनूरदित्यां॥ चतुर्भुजःशंखगदाब्जचक्रःवित्रोगवासानलिनायतेक्षणइति॥
अत्रब्रह्मस्तुतेर्लोक्याकिंचित्कालमनुष्यादिवद्गर्भेवस्थितिःसूचिता॥ वामनपुराणेत्वत्रमुक्ता॥ तत्रहिविष्णुःकवर्त
तइतिसर्वेषुलोकेषुनिष्पन्नकाप्यदृष्टामेरोरधस्तात्क्रविंदेवमातरमदितेजोधिकांदृष्ट्वानूत्तमस्याःकुक्षौवर्त्ततइतितस्यां
प्रविश्यनप्रह्लादनंतत्रदृष्टोविष्णुरितिश्रुतिपादितंगतांदृष्ट्वादेवजननींसर्वतेजोधिकांमुने।विवेशदानवपतिरन्वेषुंमधुसू
दनं॥सदृष्ट्वाजगतांनाथंमाधवंवामनाकृतिं॥सर्वभूतवरंदेवंदेवमातुरथोदरइति॥शिवस्यब्रह्मनारायणयोर्ललाटादभि
व्यक्तिस्वेच्छाधीनेतिमहाभारतकूर्मपुराणेयोदर्शितं॥अनादिनिधनोदेवश्चैतन्यादिसमन्वितः॥ज्ञानानिचवशोयस्य
तारकादिन्यशेषतः॥अणिमादिगुणोपेतंमैश्वर्यंतत्वकृत्रिमं॥स्रष्ट्यर्थंब्रह्मणःपुत्रोललाटादुत्थितःप्रभुरिति॥सहिपूर्वो १३

र्ष्टकल्पेजातस्तोषितस्तपसाविधेः॥ ललाटादनियोज्योपिपुत्रत्वेनप्रकल्पितइति।अहंचभवतोवत्काल्पांतेघोररूप
धृक्॥शूलपाणिर्भविष्यामिक्रोधजस्तवपुत्रकइतिच॥ एवंनिर्दिष्टःपरमेशेनमहेशेनललोहितः॥ पुत्रोभूत्वानुगृह्णा
तिब्रह्माणंब्रह्मणानुजः। तस्यहृत्कमलस्थस्तेनियोगादंशजोविभुः॥ ललाटंतस्यनिर्भिद्यप्रादुरासीन्महेश्वरइ
त्यादिशैवलिंगादिवचनमपिद्रष्टव्यं॥गर्भवासादिकं तुशिवस्यकविरपिनास्तीत्यपिस्कांदे सनत्कुमारसंहितायांमुक्तं॥भु
तानामधिपोरुद्रःक्रीडन्ततिचरोवृषा॥स्वेच्छयापिनयस्याहुर्हतसंसारसंग्रहं॥पुराब्रह्मादिपल्यःकरादेवाभवत्कृतः
॥स्वल्पांशेनापिपर्जन्यस्यदुर्वासत्वमुपाहरन्निवस्मृतं॥एवमकृष्णावतारयोरिंद्रजित्शाल्वादियुद्धेषुतदीयैःस्तुतिर्वैधो
र्च्छेसादिकं रामायणभारतादिप्रसिद्धमवसानेदेहत्यजनंच॥ गोप्रतारंततोगच्छेत्सरस्वास्तीर्थमुत्तमं।पत्नरामोगतः
स्वर्गंसभृत्यबलवाहनः॥देहंत्यक्त्वादिवंयातस्तत्तत्तीर्थस्यवैभवादिति एवंरूपभासादिवचनप्रसिद्धंकृष्णेशरीरंतस
भृतप्राकृतशरीरलिंगंनिर्दोषंचेत् कथंविलुप्तंमनुष्येषुप्रपद्यतेचिंताभ्रमव्रणाज्ञानदुःखयुक्तदृश्यते कथं॥एवंमेसंशयोब्र
ह्मन्स्वदिशाल्य इवार्पित॥अनिर्धार्योपरैर्मर्त्यैःस्कांदेयोक्त्वासमुद्भवेत्यादिप्रश्नैर्ब्रह्मांडपुराणादिषुनारदादेःशंकितं
स्त्रीपुंमलानुषंगान्मोहोनास्त्यविजायते॥किंतुनिर्दोषचैतन्यंस्वकांतनुं॥प्रकाशयतिसैवेयंजनिर्विष्णो

नचापरा॥ तथाप्यरूपमोहार्थंपरेषांचकथंचित्कथंचित्॥ दुःखज्ञानश्रमादिं श्चदर्शयेच्छुद्धसद्गुणः॥ कश्मणादिकचाज्ञानं स्वतंत्राचिंत्यसद्गुणैः॥ दीर्घभ्याञ्चवमोक्षस्य दर्शयेत्तानजोहरिः॥ कृष्णोत्यत्यत्कटेहोपित्यक्तदेहस्यदेहवत्॥ लोकानांदर्शयाभासस्वरूपसदृशाकृतिमित्यादिवचनजातंप्रदर्श्यपत्लेपरिहरणीयं॥ शिवस्यतुदेहत्यागः कथंचिदपिनश्रुतः॥ किंतरूपधारिण्यपितस्मिन्नर्जुनबाणैः क्षतिबाधानाप्तहित्युक्तं महाभारते। अतोर्जुनःशरवर्षंकिरातेसमवाकिरत्॥ तत्प्रसेन्नेनमनसाप्रतिजग्राहशंकरः॥ मुमूर्षोर्शरवर्षंतुप्रतिगृह्यपिनाकधृक्॥ अनेनशरीरेणतस्थौगिरिरिवाचलः॥ सदृष्ट्वाबाणवर्षंतमोघाभूतंधनंजयः। परमंविस्मयंचक्रे साधुसाधित्ययाब्रवीत्॥ एवंशिवस्यहरिविरिंचिललाटाद्यावित्रावमात्रस्यकर्मोधीनत्वपरिहारार्थंमैच्छिकत्वमुपपादनीयं॥ विष्णोस्तुकर्मार्याणिंतुपरेषांगर्भधामयोरपितयावत्संहरूक्रेणजनिरन्येषांहरेरस्तुनैवतत्। नित्योदितज्ञानतनोःकुतःस्यात्स्वकृतोजनिः॥ नावतारेष्वपिहरेर्देहःकर्मादिसंभवः॥ तथापिस्वकृतंसंस्थःसन्मायुर्देहप्रविश्यच॥ विनापिस्वकृतंतेनैवकेवलज्ञानरूपकः॥ उदेतिभगवान्विष्णुःकोलोलोकंविमोहयन्दुरित्यादिगारुडवाराहादिवचनजातंप्रदर्श्ययतेनोपपादनीयं॥ इत्थंअजातइत्यवकश्चिद्रूपपद्यते॥ रुद्रपक्षेदक्षिणमुखंतेनमांपाहिनित्यमित्यादिश्वेताश्वतरोपनिषन्मंत्रेणाजातमिमंमत्वाजन्मनिर्भीरवः॥ रुद्रस्या १८

स्यप्रपद्यतेरक्षार्थंदक्षिणंमुखंमितिशिवपुराणवचनोपबृंहितेनब्रह्मविष्णुरुद्रेंद्रास्तेसंप्रसूयेतनकारणमित्यर्थेर्वशिरवाक्येन चयस्मात्सर्वमिदमितिप्रागुदाहृतशिवपुराणवचनोपबृंहितेनशिवएवजनिरहितः॥ अन्येसर्वेपिजनिमंतइत्यवधारितेपि तस्यजनिमत्त्वेपत्वजनेरेपिलाभावःसमर्थितः॥ अथतामसत्वंसंहाररुद्रधर्ममपिपरशिवधर्ममपिपरशिवधर्ममप्युपेत्य तस्यदोषत्वाभावःसमर्थ्यते॥ कालाग्निरुद्रवपुषाभगवन्भवार्तिंकल्पावसानसमयेषुहरन्प्रजानां॥ गृह्णासिशंकरतमःक रुणैकमूर्तिःशस्त्रंनृणाव्रणरुजेशमयन्निवत्वं॥२०॥ किंमिहतामसत्वंदोषत्वेनोपपाद्यतेकिंतमोगुणमुपकरणंकृत्वासकल जगत्संहरतीतिनैर्घृण्यापादकत्वेमनमोगुणोपकरणत्वेनदोषत्वमुपपाद्यतेउतप्राकृतजनवत्तदभिभूतत्वं॥ तत्राद्यपक्षनिराकरणार्थंश्लोकः॥ संसारमहाध्वनिरंतरागतातिश्रांतात्मनांक्षणिकः किंचित्कालंमहासुखप्रापादनेनविश्रांतिंप्रापयितुंसकलंजगत्संजिहीर्षन्महादेवस्तत्संहारोपकरणतयातमोगृह्णातियथाचिरकालव्रणरुजार्त्तोनिद्राहारसहितानतिदुःखमनुभवतोमनुष्यव्रणरुजार्त्तपनयनेनस्वकरवपितुंतात्कालिकंकिंचिद्दुःखकरमपिव्रणच्छेदंकरिष्यन्व्रणेवैद्यस्तूदपकरणंतथाशस्त्रंगृह्णातिनचशस्त्रग्रहणंव्रणच्छेदनंचतस्यनैर्घृण्यापादकंकिंत्वंव्रणीरक्षणीयइतिपरमदयालुत्वज्ञापकमेवतदेतदुक्तंशिवपुराणेनिदानज्ञस्यभिषजोरुणाहिंसांप्रयुंजतः॥ नकिंचिदपिनैर्घृण्यंघृणेवात्रप्रयोजिकेति॥ अथद्वितीयविकल्पंनिरस्यति॥ निद्रालु

नानतवशंकरशक्यशंकाकौर्यं किमप्यनुचितेविषयेनदृष्टं॥ नान्योपिकश्चनगुणस्तमसोविकारः शक्याकथंवबुधेस्तमसाभि
भूतिः॥२७॥ तमसाभिभूतस्यहिनिद्रापारवश्यं भवतिनतद्दृश्यशंकाजागरेप्यनुचितविषयेतस्यकौर्यंभवतितदपिशिवस्य
क्वचिदपिनदृष्टं। ननुत्रिपुरजलंधरादिवधमूलस्यकौर्यस्योचितविषयत्वेपिब्रह्मपंचमशिरोलवनदक्षाध्वरध्वंसनादिदेवता
निग्रहमूलंकौर्यंतनुचितविषयमितिचेत्। उच्यते। निग्रहस्तावद्द्विविधः॥ अनुग्रहोद्देश्यकस्तदनुद्देश्यकश्च॥ आद्योपित्रिवि
धः॥ आद्योनुग्राह्यानुग्रहोद्देश्यकस्तद्धितरानुग्रहोद्देश्यकः उभयानुग्रहोद्देश्यकश्च॥ तत्राद्यः सदाचारानुवर्त्तनाद्यर्थः पुत्रशि
ष्यादिनिग्रहःसतुगुणएव॥ द्वितीयाबद्धेतरानुग्रहार्थश्चैव दोषः॥ एकस्मिन्धनिधनंप्राप्तेदृष्टचारिणोबहूनांभवतिक्षे
मंतत्रपुण्यप्रदोवधइतिशिववचनात्सयथामृगव्याघ्रादिवधः॥ वोवधउभयानुग्रहोर्थः। राजभिर्धृतदंडास्तुहित्वापापा
निमानवाः॥ निर्मलाःस्वर्गमायांतिसंतःसंतःसुकृतिनोयथेतिवचनात्। एवंनिर्दोषाणांमध्येन्यतमएवंशिवकृतःसर्वोपिनिग्र
हः॥ अतःपुत्रादिनिग्रहवद्ब्रह्मादिनिग्रहोप्युचितविषयएव॥ नदुर्वाशिवपुराणे येपुनर्निग्रहाःकेचिद्ब्रह्मादिषुनिदर्शिताः।
तेपिलोकहितायैवकृताःश्रीकंठमूर्त्तिना॥ अजस्यास्याधिपत्याहिश्रीकंठस्यनसंशयः॥ श्रीकंठाख्यंशिवामूर्त्तिंक्रीडंतीम
धितिष्ठति। सदोषाएवदेवाद्यानिगृहीतायथोचितं। ततस्तेपिवि —— प्रजाश्चविगतज्वराः॥ निग्रहोपिस्वरूपेणविदुषांनानु

गुम्मितः॥ अतएवहिदंडेषुदंडोराज्ञांप्रशस्यते॥ यस्मिन्हिरिश्वरत्वेनकार्यवर्गस्यकृत्स्नशः॥ नसचेदीशतांकुर्याज्जगतःकथमी
श्वरः॥ हितसदानिषण्णानामीश्वरःस्यान्निदर्शने॥ सकथंदुष्यतेसद्भिरसतामेवनिग्रहात्॥ सर्वोपिनिग्रहोलोकेनचविद्वेषपू
र्वकः॥ नहिद्वेष्टिपितापुत्रं योनिगृह्णात्यशिक्षयेदिति॥ एवंनिद्राकौर्ययोरप्यपिमोहादिविकारोयदिदृश्येततदाकल्पेता
पितमोपिभूतत्वं॥ अतस्तत्तत्स्याप्यभावात्तत्कल्पनंनिरवकाशमितिप्रायः कार्यदर्शनेनदधिभूतत्वं कल्प्यतेचेत्। विष्णो
रेवतत्कल्प्येत तस्यप्रायेणनिद्रावलिबंधनभृगुपत्नीतादृक्काकालिवधादिषुवासुदेवका —— प्रवधादिष्वनुचितविषय
कौर्यरामकृष्णावतारयोः शोकमोहादिविकारश्चदृष्टः तस्मान्निद्रापारवश्यं तावत्सभावपरमेश्वरेणोक्तं॥ आदिदेवःपुरा
णात्मानिद्रावश्यमुपागतः॥ शेतेस्मसततंविष्णुर्मोहयन्जगदव्ययइतितच्चतामसत्वलिंगमितिनृसिंहं प्रतिशरभेणोक्तमिति
स्कांदप्रतिपादितं। यत्तामसकलांशगृहीतस्त्वंपयोनिधौ॥ निद्रापरवशःशेषे कथंतत्सात्विको भवानिति॥ भारतयुद्धेश्री
कृष्णास्यतत्तद्धोपायछद्मव्यापाररूपाशल्यपर्वणिदुर्योधनेनपरिगणितः॥ तत्रहिभगवंतंवासुदेवंप्रत्येवादिक्रुद्धस्यदुर्यो
धनस्येमानिवचनानि॥ कंसदासस्यदायादस्तेलज्जास्तेतवे॥ अधर्मेणगदायुद्धे यद्हंनिपातितः॥ उरुभिर्धातितंभीमस्य
स्मृतिंमिथ्यायदिच्छसि। किन्नविज्ञातमेतन्मे यद्र्जुनमवाविध॥ पातयित्वामहीपालान्नृजुयुद्धात्सहस्रशः॥ जिह्मैरुपायै

निपुणेनैतेलज्जानतेघृणा॥ अहन्यहनिशराणांकुर्वाणाकंदनंमहत्॥ शिखंडिनंपुरस्कृत्यघातितःसंतनोसुतः॥ अश्वत्थाम्नःस
नामानंहत्वानागंसुदुर्मते॥ आचार्यात्याजितंशस्त्रंकिंतन्नविदितंतव॥ सत्त्वोनेननृशंसेनधृष्टद्युम्नेनवीर्यवान्॥ हन्यमा
नस्त्वयादृष्टोनचैनंसमवारयत्॥ वधार्थंपांडुपुत्रस्ययाचितांशक्तिमेवच॥ घटोत्कचेव्यसर्जेथःकृत्वतःपापकृत्तम॥ छि
न्नहाहुःप्रापगतस्तयाभूरिश्रवारणे॥ त्वयानिसृष्टेनहतःशैनेयेनदुरात्मना॥ कुर्वाणश्चोत्तमंकर्मकर्णःपार्थजिघांस
या॥ व्यसनेनात्मसेनस्यपन्नगेंद्रंस्तस्यैव॥ पुनश्चपतितेचक्रेव्यसनार्त्तःपराजितः॥ पातितेरथेकर्णेचक्रव्यूहेभ
यार्त्तानां॥ यदिमांचैवकर्णेचभीष्मद्रोणौचसंयुगे॥ अर्जुनेनप्रियुद्धेथाःनैतस्याहुर्जयोध्रुवं॥ त्वयापुनर्नारायणजिस्व
प्रागेणपार्थिवाः॥ स्वधर्ममनुतिष्ठंतिवयंचान्येचपार्थिवाः॥ त्वयामायाविनाकृष्णमायांकर्मयमा[ण]णां॥ कृत्वाहतःसिंधु
पतिःकिंतन्नविदितंमम॥ एवमुक्त्वादुर्योधनेननेमविषादोमामेनपोदनशिरआहनं॥ [व]कावाकेकरावाणिधे
यंनिवदक्षणादितिभीमसेनस्याध्युपहासेकृतेदिविदेवताभिर्दुर्यो धनस्यकृतंप्रशंसांतस्यो[त्]पुष्पवृष्ट्यादिकंचव
र्णयित्वाततोवासुदेवादिनामनुचितशाल्यादिकरणनिमित्तंव्रीडाचिंतादिकंमप्युक्तं॥ अत्यद्भुतमितेदृष्ट्वावासुदेवपु
रोगमाः॥ दुर्योधनस्यपूजांचकृत्वाव्रीडामुपागमन्॥ हतांश्चाधर्मतःश्रुत्वाशोकार्ताःशुशुचुर्नृपा[ः]॥ भीष्मंद्रोणंतथाकर्ण

MEMORIAL

भूरिश्रवसमेवच॥ तांस्तथाचिंतापरान्दृष्ट्वापांडवान्दीनचेतसः॥ प्रोवाचेदंवचःकृष्णोमेघदुंदुभिनि[ः]स्वनः॥ अश्वमेधि
पितृमेधिकमुनिपत्ययादितिप्रस्तुत्यतत्रश्रीकृष्णप्रतिशाल्येनदुर्यो धनादयोनिहताइतिकोपःकृतइ[ति]वर्णितं॥ आयांतमेत्य
गोविंदंसमन्युर्मुनिरब्रवीत्॥ सर्वास्त्वंधार्त्तराष्ट्रादीन्शाल्येनानाशयन्नृपान्॥ अतःशेषंत्वांकृ[ष्ण]त्यक्तस्तुहरिरहमइति
॥ एवंचनारायणेतमःकार्यंतयाशंक्यमानेनिद्रादिकमित्यंपरिहरणीयं॥ तस्यनिद्रानयनेनिमी[ल]नंस्वात्मतत्वानुचिंतनरू
पा॥ शोकमोहादिरभिनयमात्रं॥ अन्यथितविषयकौर्यसंवर्तन्तद्ध्यदुष्कर्मविशेषाद्यायतमिति॥ [त]थैवतत्रपुराणेपुरामा
यणभारतयोश्चपरिहारःकृतोदृश्यते॥ तदेवंयथानारायणस्यतमोभिभूतत्वंशंकायत्नेनपरिहरणं॥ आसीत्तेनैवशिवेकि
यत्यपिशंकाप्रसरंलभते॥ तदेतत्सर्वंव्यतिरेकमुद्रया[ऽ]नेनश्लोकेनदर्शितं॥ ननुविष्णोःसात्विकत्व[म]सिद्धंतद्विरोधितामस
त्वशंकास्पदमपिरूपपरिहरमितिचेत्तदपिशिवस्येवतत्कल्पसिद्धमित्याह॥ सत्वप्रवर्जनकरस्त्वमसि[द्धा]तीतःसत्वेननुध्वंशिवस
त्यप्रयत्नवत्वं॥ एतावदद्रितनयाधियसात्विकत्वंकिंसंभवेत्कत्वनतामसतताविरोधि॥२२॥महान[प्रभुर्वैपुरुषःसतस्यैषप्र
वर्त्तकइतिश्वेताश्वतरोपनिषद्यान्नायते॥ शिवस्यसत्वंविग्रहःनमःस्वकार्यकारणोपाधिः॥ विष्णो[स्तु]विपरीतमितिसूक्तमं
हितायामुक्तं॥ यस्यमायागतंसत्वंशरीरंस्यात्तमोगुणः॥ संहारायत्रिमूर्त्तिनांसरुद्रःस्यान्नचापर[ः]॥ तयायस्यतमःसाक्षात

शरीरंसात्विकोगुणः॥ पालनायधिमूर्तिनांसविष्णुःस्यान्नचापरइति॥ सत्वंदेवाहरादयइतिवासिष्टनारायणोदेवतिर्यङ्म
नुष्येषुसत्वादिगुणविशेषेणशिवस्यप्राधान्येनसत्वमयत्वमुक्तं॥एतावत्सात्विकत्वंशिवादन्यत्रक्वापिनसंभवति॥विष्णोर्हि
पालनोपाधिनामात्रेणसत्वपरिग्रहः॥ सतुसर्वत्रसत्वप्रवर्त्तनस्वतंत्रेणशिवेनप्रवर्तितस्यसत्वस्यपालनसामर्थ्यसिद्
धेनतत्रसमुन्मेषणेपिसंभवति॥ननुतामसतादिरोधिसात्विकत्वं शिवस्यासिद्धंचेत्कथमयमुग्रोभीमभव्ययदिश्यतइ
त्याशंक्याह॥उग्रस्त्वनुचरायाजगतःसमस्ताद्भूयासमुग्रइतितत्सतांहिदृष्टा॥भीमोसिशंकरनियंतृतयासिलानांवे
दःप्रणोतिमन्तएवमहाभयंत्वा॥२३॥उग्रशब्दउत्तरवाच्यप्यस्ति॥उग्रोस्युग्रोहंसजातेषुभूयासमितिवेद——स्याश॥
स्यत्वश्रवणात्॥रुद्रमेरुद्रच्छत्तस्तरोभवतीत्यस्मिन्नर्थेरुद्रोग्रवज्रेत्याद्योणादिकसूत्रेणरप्रत्ययांततयाभिपातितोयमु
ग्रशब्दःशिवस्यसर्वोत्तरत्ववाचीनक्रौर्यवाची॥भीमशब्दस्तुभयंकरत्ववाच्येवतस्योत्कर्षेभावइति॥यदिदंकिंचजगत्सर्व
प्राणएजतिनिःसृतं॥महद्भयंवज्रमुद्यतंयएतद्विदुरमृतास्तेभवंतीतिमंत्रतःसर्वजगद्भयहेतुत्वस्यसकलनियंतृ
ब्रह्मधर्मतावगमात्॥अतोस्यसत्वप्रवर्त्तकत्वादिलक्षणंसात्विकत्वंकियंतमपितमोगंधंनसहतइतिभावः॥सत्वप्रव
र्त्तकत्वलक्षणंसात्विकत्वंहिलेनरेणाप्युपपादयति॥सरव्यातिशयिगुणसत्वनिधित्वेभवज्ञानंस्फुरंश्चयदिसत्वगुणादवा॥ १७

प्यं॥जानीमहेनदुभयंत्वदधीनमीशजाबालसूनृतमुरवैर्ननुजन्मभाजं॥२४॥जाबालोपनिषदिरुद्रस्तावकंब्रह्मरूपव्याचक्ष्ये
नासावमृतिभूत्वामोक्षीभवतिसर्वमुक्तोपासनयाप्रसन्नस्यशिवस्योपासनकालेसंसारतारकप्रणवार्थीभूतपरब्रह्मविद्या
प्रदत्वंश्रूयतेतस्याश्चविद्यायाःफलंजीवन्मुक्तिस्फुरत्वरूपंपरममुक्तिस्फुरत्वरूपंचक्रमप्राप्यममृतीभवनमोक्षीशब्दाभ्या
मभिधीयते॥जीवन्मुक्तिस्फुरत्वकल्पमेव॥यदाहुः॥यच्चकामयतेरुद्रंलोकेपञ्चदिव्यंमहत्तपः॥तृष्णाक्षयस्फुरत्वंस्यैतेनार्हं
तःषोडशींकलांमित्यादि॥इदंभवशिवस्यज्ञानप्रदत्वं॥सनोदेवःप्रचोदयात्स्मृत्वासंयुनक्तिकितितेतिरोपनिषदिमनोबुध्या
दिभिःसंयुनक्तिकितिरुद्रेणेश्वतरोपनिषदित्वत्तत्प्रार्थनाज्ञानद्वारापतिपाद्यते॥तत्रस्फुरत्वंजीवन्मुक्तिपरममुक्तिस्फुरत्व
त्वमेवजाबालश्रुत्येकार्थात्॥एवंज्ञानस्फुरत्वेप्रयच्छताशिवेनानुगृह्यस्वमुक्तोदेकःकारणीयःसत्वात्स्फुरत्वंचज्ञानंचेतियो:
सत्वाधीनत्वस्मृतेःअतःशिवएवसत्वप्रवर्त्तकःअतःसर्वंतत्प्रवर्त्तनीयतत्कार्योपयोगिस्फुरत्वोद्रेकविशेषप्राप्तइतियुक्तमेव॥अ
प्यशिवस्यज्ञानप्रदत्वेहत्वंतराण्याह॥विद्याप्रदंवरदविश्वसिमःकमन्यंविद्याधियेभवनिवित्त्वयुवोपतीतो॥सर्वज्ञानाप्तिनि
समुन्मिषदिदुन्कृदुसव्यार्धविग्रहसमाकलितात्मविद्ये॥२५॥ईशानःसर्वविद्यानामितिपदेनेशिवस्यसर्वविद्याधिपत्यंप्रसि
द्धंततःसिद्धमेवसर्वविद्यानांतदधीनत्वं॥ज्ञानानिन्ववशेयस्यतारकादीन्यशेषतइतिमहाभारतेप्युक्तं॥ब्रह्मोडपुराणेपिमध्य

मभोगगुणोपपत्त्यानेशिवस्यमहारकालएवतदुपकरणत्वेननमोगुणग्रहणंसर्वदाविशुद्धज्ञानमयत्वंचवर्णितं॥महासद्भावयु
क्तायप्रलयेतामसात्मने॥विशुद्धज्ञाननत्वायतुभ्यंरुद्रात्मनेनमइतिविश्वगुरुत्वंशिवस्यशिवपुराणेप्रतिपादितं।प्रतिसर्ग
प्रसूतानांब्रह्मणांशास्त्रविस्तरं॥उपदेष्टासएवादौकालावच्छेदवर्तिनां॥कालावच्छेदयुक्तानांगुरुणाप्यंमोगुरुः॥
सर्वेषामेवसर्वेशःकालावच्छेदवर्जितः॥इतिअस्मदभिमतार्थपतंजलिर्योगसूत्रेसूत्रयामास॥तत्रहिक्लेशकर्मविपाकाशयैरपर
मृष्टःपुरुषविशेषईश्वरइतिप्रस्तुत्यसूत्रंसपूर्वेषामपिगुरुःकालेनानवच्छेदादिति।किंचऋषीणामपिसर्वज्ञेसमानोशि
वस्यविशिष्यसर्वज्ञइतिनामतस्यविश्वगुरुत्वोपयोगिनित्यमिदंनिरतिशयसर्वज्ञत्वसद्भावयुक्तं॥अतएवशिवपुराणेपिशिव
स्यैवादिगुरुत्वोपपादनार्थंतद्वर्णनात्प्राक्प्रयत्नतो।लोकेसातिशयत्वेनज्ञानेश्वर्येविलोकिते।शिवेनातिशयत्वेनस्थितिंप्रा
हुर्मनीषिणइति॥पातंजलेपि।सपूर्वेषामपीतिसूत्रातप्रार्वानसूत्रं।तस्यनिरतिशयंसर्वज्ञबीजमिति।शिवस्यचंद्रशेखर
त्वंप्रसिद्धं॥सचंद्रःसकलज्ञानमयइवशिवस्त्रिषुप्रसिद्धं॥ज्ञानचंद्रकलाचूडंरुद्रादिब्रह्मंडलं।त्रैगुण्यादिमयैर्भातं
दिव्यैरंशुभिरायुधैरिति॥ततश्चयथान्यसूत्रप्रवृत्ताःक्षुधितानामन्नार्थिनामयमन्नदातेत्यभिज्ञेयोपसर्पणेनानुग्रहार्थस्व
प्रसादशिखरेघन्तध्वजंवधंतिएवंशिवोपिस्वयंज्ञानप्रदइतिप्रत्यापनेनलोकानुग्रहार्थंज्ञानमयींचंद्रकलांशिरसिबबंधे १८

तिततंतापितस्यज्ञानप्रदत्वमवगम्यते।अपिचभगवत्कमादेवीब्रह्मविद्याप्रदायिनीतिश्रुतिपुराणप्रसिद्धं।तत्रवकारिणामुप
निषदिहितस्याःशक्तादीनांप्रतिश्वेताश्वतराणामुपनिषदिअपिमहर्षीन्प्रतिचब्रह्मविद्योपदेष्टृत्वमाम्नातं॥कूर्मपुराणेचई
श्वरगीताख्योगाध्यायेतस्याःसकललोकानुग्रहैकरसिकशिवनियोगाद्ब्रह्मविद्याप्रदत्वंमुक्तं।तत्रहिब्रह्मविष्ण्वादीनां
शिवनियोगेनसृष्टिपालनसंहारादिकर्तृत्वप्रतिपादनप्रकरणेशिववचनं॥पार्वतीपरमादेवीसर्वविद्याप्रदायिनी॥यापिध्या
तात्विशेषेणसात्विमद्दचनानुगेत्येवंभूतात्भगवत्सुप्रायदिग्रहेकदेशरूपातस्यज्ञानप्रदत्वंकेमुतिकन्यायसिद्धं।अतःशिवमपहा
यमुक्तिहेतुज्ञानप्रदत्वमन्यस्यकल्पयितुंनशक्यमित्यर्थः।स्फुरत्प्रदत्वमपिहेत्वंतरैरुपपादयतिश्लोकद्वयेनांशुमः॥श्रुतोपि
ननुतृप्तिविरागशालीवैराग्यचिन्हभरितश्चमहेश्वरत्वं।तत्त्वंभपाशस्फुरणसाधनमंतरेणकस्मात्सुखंमयितुमर्हतिदेहभाजां॥२६॥
यज्जीवरत्नमखिलागमलालनीयंयेचत्रिनेत्रमृडशंकरनामधेये॥एतैरपिस्फुटमनन्यसमाश्रयंतेविज्ञाप्यतेसकलजीवस्फु
रत्वावहत्वं॥२७॥शिवस्यसकलजीवस्फुरत्वप्रदत्वेतस्यनिरतिशयस्फुरत्वावहत्वंहेतुंकृत्वातस्यहेतोःसमनोर्थेर्थेहेत्वंतरमाय
श्लोकेनाच्यते॥शंभवतीतिशंभुःकर्त्रर्थेडुप्रत्ययःसर्वेषामप्यात्मनांस्फुरत्वालक्षणेपिविशिष्येवंव्यपदेशोनिरतिशयस्फुरत्व
त्वाभिप्रायः।अतएवतस्यनित्यतृप्तिःनित्यंचविषयस्फुरत्वेवेतृष्णंशिवशास्त्रेषुप्रसिद्धमाम्नायते॥सर्वज्ञतातृप्तिनोरेदिबोध

स्वतंत्रतानित्यमनुभवरूपः॥ अनंतशक्तिरूर्ध्वविष्णोर्विधिज्ञाः षडाकुरंगानिमहेश्वरस्यज्ञानंविरागोश्वर्यंतपः सत्यंक्षमाधृतिः॥स्रष्टृत्वमाप्तसंबोधोत्यधितृप्तेत्वमेवच॥अव्ययानिदशेतानिनित्यंतिष्ठतिशंकरइति॥ज्ञानमप्रतिघंयस्यवैराग्यं चजगत्पतेः॥ऐश्वर्यंचैवधर्मश्चसहसिद्धंचतुष्टयमिति। ब्रह्मणिश्रुतमपिवैराग्यंहिरण्यगर्भेपश्यतिजायमानमितिजायमानावस्थायामेववस्यशिवकरकटाक्षानुगृहीतस्यतत्क्षणसत्योत्पन्नमितरेवननुनित्यमतएवसहसिद्धमित्युक्तं। एवं स्वस्यनिरतिशयसुखस्वरूपस्यदृष्टेननुच्छावषयैरदृष्टज्ञापायतुमवावषयभोगलंपटमूढादरणीयानिवस्त्रमाल्यभरण चंदनाद्यनुलेपनानिविहाय चर्मभुजंगस्थीनितत्स्थानेपरिगृहीतानि॥तदेतद्भगवते काश्यपवचनेनस्पष्टीकृतं॥हन्तेति यस्मात्वरितंहिदुर्भगाःस्वात्मन्नतस्यविमृषःसमीहितं॥यैर्वस्त्रमाल्याभरणानुलेपनैः॥स्वभोजनंस्वात्मतयोपलालितं मितिस्वात्मन्नतस्यस्वात्मानंदामृतसागरनिमग्नस्यसमीहितमविदुषोनिरतिशयस्वात्मानंदनित्यास्वादप्रयुक्तविषय स्करवैतृष्ण्यस्फुटीकरणाभिप्रायमजानानाःस्वभोजनंपतनानंतरंस्वभिर्भोस्समाणंशरीरं॥नचस्वस्यनिरतिशयसु खत्वमन्येभ्यःस्करवप्रदत्वेकथंहेतुःबहुधनस्यापिकदर्यस्यधनदानादर्शनात्धनसंतानादिरहितस्यापयनुग्रहसमर्थ स्ययोगिनस्तदर्शनाच्चेतिशंकनीयं॥एतस्यैवानंदस्यान्येभूतानिमात्रामुपजीवंतीतिश्रुत्यनुसारेणनिरतिशयसुखत्वा

स्पदत्वयाशिवस्यैवस्वस्करत्वमाहासमुद्रस्यक्षुद्रकणिकायामानंहेरण्यगर्भात्स्करत्वप्रदत्वसिद्धेः॥द्वितीयश्लोकेनशिवस्यस कलजीवस्करत्वप्रदत्वंएवसाक्षाद्धेतुत्वउच्यतेजीवरत्नंशिवइतिनाम॥अथहैनंब्रह्मचारिणऊचुःकिंतपेनामृतत्वंब्रूहीति सहोवाचयाज्ञवल्क्यःशंकरोद्वियेणेति॥एतानिहवाअमृतस्यनामधेयानि।एतेहवाअमृताभवंतीतिजाबालोपनिषद्भ्यो रुद्राम्नानेतानित्यमुक्तस्यशिवस्यनामधेयान्यमृतस्यसाधनान्युक्तानितेषांशिवनामात्सुकृतंविद्यात्श्रुतिरुत्कृष्टारुद्रे कादशिनीश्रुतौ॥तत्रपंचाक्षरिनस्याशिवइत्यक्षरद्वयमितिशिवागमरहस्यविदांवचनात्॥यद्यक्षरंनामगिरेरितंनृणांसकृ त्प्रसंगादघमाशुहंतितदितिभागवतेपितत्प्रशंसनात्॥अतस्तज्जीवरत्नमितिन्यरूपंतन्नशिवंकरत्ववा विशिवएकोध्येयःशिवकरइत्यथर्वशिरोपनिषदितस्यतत्प्रत्याख्यानात्॥तद्व्याख्यानार्थंहितत्र शिवंकरपदंसर्वैश्वर्यसं पन्नःसर्वत्रवरइतिपूर्ववाक्येपिसर्वेश्वरनाम्नोयौगिकतयाव्याख्यानार्थंसर्वैश्वर्यसंपन्नइतिपदांतरसमभिव्याहारदर्शना त्॥समेधयतियन्नित्यंसर्वार्थानामुपक्रमं।शिवमिच्छन्मनुष्याणांतस्माद्देवःशिवःस्मृतइत्यनुशासनैकवचनेनापिशिव नाम्नाशिवंकरत्ववाचित्वंस्फुटीकृतं॥इच्छैवहिसंकल्पमात्रेणसकलप्रपंचकरणेसमर्थमस्तुमेसर्वेदानवाञ्छाम रात्रयेशिवोस्मिसर्वभूतानांशिवत्वंतेनमेस्तुइतिकर्णपर्वणिशिववचनेनापिनस्यतद्भावित्वंस्फुटीकृतएवंचशिवशब्दात्

कर्तारित्यर्थेतात्यचाद्यचूर्णरनिटीतिणिलोपवमतिशिवनामनिष्पत्तिर्द्रष्टव्या ॥ मृडमृकवनइतिधातोः स्फरवयतीत्यर्थेमृडशब्दः
२ शंकरशब्दश्चशिवंकरवाचीतिस्पष्टमेव ॥ एवंतावन्मत्वदाद्यंस्यब्रातिशप्रसिद्धिसिद्धस्योद्धारः कृतः अथपाशुपत्यवरणस्य
क्रियते ॥ यत्पाशुपत्यमवृणोदितिः श्रवणीशंसत्यर्थेमितत्पवनदीशनित्यं ॥ नित्यंयदर्थहेतुरादिर्विधिस्तदर्थंतस्यैवकल्पयतिसा
हिवरेणलाभं ॥ सोब्रवीद्वरंवृणा अहमेवपशूनामधिपतिरसानीतिनित्यसिद्धं श्रुतिर्विवादेवहिस्तेनचरोवृतइतिब्रवीतिअ
स्यश्रुतिवाक्यस्यप्रवृत्तेः । भागेवतुवरेण मृतेनभाव्यं अन्यथासोब्रवीदितिभूतार्थप्रयोगानुपपत्तेः अतोयत्रयत्रानादिकस्य
प्रवृत्तेषुपूर्वपूर्वकल्पेष्विदंवाक्यंयतस्तेततस्ततः पूर्वसिद्धेनपाशुपत्येनभाव्यमित्यस्मादेववाक्यात्पाशुपत्यमनादिसि
द्ध्यति एवमेवहियागहोमादीनांतयातयादेवतायावरवरणलब्धेनप्रतिपादितानांनित्यत्वंसमर्थनीयं अन्यथासर्वेषाम
पिवैदिककर्मणामनित्यत्वंप्रसज्येतेतिकल्पभेदेधर्मोधर्मेविप्लवःस्यात् । तस्माद्यथानित्यसिद्धतत्तद्देवताकर्मसंबंधप्र
ख्यापनद्वारातत्तत्संप्रतिपन्नोवरवरणार्थवादः कर्मप्रशंसार्थएवानमपिनित्यसिद्धपशुपतिभावप्रख्यापनद्वारा कर्मप्र
शंसार्थोर्थवादइत्यर्थः । इत्थंकर्मप्रशंसार्थमर्थवादत्वमभ्युपेत्यैवतत्रविष्णोरापतन्नित्यंतापकर्षोपिपरिहारणीयः ॥ अ
न्यथातइषुंसमस्कुर्वतात्रिपुरसंहारेण्यकरणतयारुद्रशेषतयाइषोर्मध्यावय २०

वातांदेवैस्तद्रिच्छयैवनीतत्वेनश्रुतस्यविष्णोरत्यंतापकर्षःसम्पापतोन्ननिवार्यः स्यादितिभावः । वरवरणमभ्युपेत्यापिपरिहा
रांतरमाह ॥ शङ्कोतिनैवपशुपाशपतान्विवेक्तुंमुक्तःकथंभवतुमोहितएषलोकः ॥ इत्याकलय्यभगवन्यदिवारणेन स्पष्टीचक
र्यतदिदंकिमुदूषणया ॥ २९ ॥ पाशुपतव्रतानुष्ठानाधीनः पशुत्वपरित्यागरूपोमोक्षस्तदनुष्ठानंचदेवमनुष्यादयोवयंपशवः
पशूनांचास्माकंपतिः शिवइतिज्ञानसापेक्षतज्ज्ञानाभावेपाशुपतव्रतानुष्ठानासंभवाल्लोकस्यमुक्तिरेवनस्यादितिविचार्य
सकललोकानुग्राहकः शिवएववरणव्याजेननित्यंनित्यसिद्धंपाशुपत्यंसर्वलोकप्रसिद्ध्यर्थंस्पष्टंचकारेत्युपपद्यतइत्य
र्थः ॥ अयंप्रकारोलैंगेदर्शितः । स्वतः सिद्धंपतित्वंमेयुष्माकंपशुतापिच ॥ तदत्रदर्शयाम्यद्यपणबंधविनोदतद्इति । फला
भावेपिसृष्ट्यादिव्यापारवत्पाशुपत्यवरणंलीलामात्रेनास्त्वितिपरिहारांतरमाह ॥ किंतेधवावरवृत्तेः फलचिंतनेनलीलैवशू
लधरयंततमीदृशीते ॥ उद्दिश्यकिंफलमवाप्तसमस्तकामःशश्वत्सृजस्यवसिसंहरसिप्रपंचं ॥ ३० ॥ एवंपाशुपत्यवरणमेव
नास्तीतितत्स्तेपिनित्यसिद्धस्यैवपाशुपत्यस्यप्रत्यापनार्थंतदितितथाभूतफलाभावेपिसृष्ट्यादिवल्लीलाम्पत्नंतदितिचप
रिहारैःपाशुपत्यस्थानादिसिद्धत्वमुपपादितं ॥ तस्यतथात्वानंगीकारेबाधकमाह । आगंतुकंयदिभवेत्तवपाशुपत्यमर्थो
पिनिस्तरतिनानुपपत्तिसीमां ॥ संसारिणोहिसकलाःपशवोनिरुक्तःस्यःदादिमत्कथमपीश्वरवत्पतित्वं ॥ ३१ ॥ पाशुपत्यं

हि सर्वजीवान्प्रत्याधिपत्यरूपंसर्वेश्वरत्वमेव॥ आत्मनः पशव इत्युक्ताः सर्वेसंसारवर्तिनः॥ तेषांपतित्वाद्देवशाशिवःपशुपतिः स्मृतइतिशैवलैंगादिपुराणेष्वेषा दृतस्तदनादिसिद्धपरब्रह्म धर्मेतयाधर्मग्राहकमानादिसिद्ध मादिमत्कल्पयितुंनयुक्त मित्यर्थः॥ एतेनतत्तेजोसृजतेत्यादौ भूतार्थ प्रलये पियथातेजःप्रभृतीनांचनित्यत्वंतयापाशुपत्यस्याप्यस्तित्यपिशंकानिरस्ततेजः प्रभृतीनांमनित्यत्वे पिप्रवाहानादिपूर्वपूर्वकल्पप्रवृत्ततत्तत्सृष्टेरतीतत्वं भूतार्थप्रत्ययस्यालंबनमित्युपपद्यतेननचैहभूतभाविवर्त्तमानसकलजीवाधिपत्ये परमेश्वरनित्यसिद्ध धर्मेतत्परयःप्रवर्त्तयितुंशक्यते॥ एवंप्रसाधितेपाशुपत्यानादित्वंपशुत्वं पशुत्वप्रतिबंधापिस्थापयति। आस्तांपतित्वमदस्मीयमिदंपशुत्वंनार्हत्यधीशकथमप्यधुनातनत्वं॥ यद्यस्तितस्यवरणश्रवणेपिकाचिन्निर्वाहरीतिरपरानकिमत्रसास्यात्॥ ३२॥ पतित्ववरणकाले सर्वेषामात्मनांपशुत्वमपि सहवृत्तमितिलैंगादिपुराणेषु प्रसिद्धं तथाभारते पिकर्णपर्वणि॥ पशुत्वंचैवमेलोकाः सर्वेकल्पेनुपीडिताः॥ पशूनांचपतिश्चाहं भविष्यतिसुरोत्तमाः॥ इतिदेववचः श्रुत्वादेवदेवस्यभूपते॥ विषादमगमन्सर्वे पशुत्वंप्रविशंकिताइतित्पशुत्वं सादिभवितुंनार्हतीतितद्वरणश्रवणेयः परिहारः प्रागुक्तेधन्यतमो वान्यो वासएवपतित्ववरणश्रवणेप्यस्तित्यर्थः॥ भवतुपशुत्वमपिसादीत्यतआह। मायादिपाशदृढत्वं धनंमोहितानांयत्स्वामिकर्मकरणंयजनादिरूपं॥ गौणंपशुत्वमिदमेव

हिदेहभाजापतच्चराचरपतेः कथमादिमत्स्यात्॥ ३३॥ लोकानांपशुतंनमुख्यंशिवंप्रति वात्रवादिरूपंपशुत्वं तद्भावात्किंतुयथागवाश्वादीनांस्वामिनापोषेर्वहनांदोहनवाहनादिकार्यैस्वदुपकर्तृत्वं एवंशिवेनमायाकर्मादिभिर्बद्धानांयजनादिभिराराधनरूपैःशिवोपकर्तृत्वमेवतद्वाच्यं॥ तच्चानादिसंसारप्रवाहापातं कथमपिअनादिमत्वमर्हतीत्यर्थः॥ इत्थं गौणमेषांपशुत्वंशिवपुराणेस्पष्टीकृतं॥ ब्रह्माद्याः स्थावरांताश्चदेवदेवस्यशूलिनः पशवःपरिकीर्त्यंते संसारएवप्रवर्त्तिनः॥ तेषांपतित्वाद्देवशाशिवःपशुपतिःस्मृतः॥ म—मायादिभिःपाशैःसबद्धाजातिपशूनिति॥ सएवमोचकस्तेषांभक्त्या सम्यगुपासितः॥ चतुर्विंशतितत्वानिमायाकर्मगुणाअमी॥ विषयाइतिकथ्यंतेपाशाजीवनिबंधनाः॥ ब्रह्माद्यिस्तंबपर्यंतान्पशून्बध्वामहेश्वरः॥ पाशैरेतःपतिर्देवःकार्यंकारयतिस्वकमिति॥ अथपरमेश्वरंप्रतिवरदानुःकस्यचित्संभवादपिवरवरण्यश्रवणानिनुच्छीकरोति॥ त्वामामनंतिपरमेश्वरमीश्वराणांत्वांदेवतंचपरंचदेवतानां॥ त्वामेवनाथपरमंचपतिपतीनांकस्माद्भृतंवरदविश्वसिमोवरंते॥ ३४॥ नमीश्वराणांपरमंमहेश्वरत्वंदेवतानांपरमंचदेवतं॥ पतिंपतिनांपरमंपरस्ताद्विदामदेवंभुवनेशमीड्यमितिश्वेताश्वतरोपनिषन्मंत्रार्थैकनुसंहितः॥ ईश्वराणांजगन्नियंतृणांदेवतानांजगदाराधनीयानांपतीनांजगत्पालकानामेवंपशुपत्यवरणंदोषइत्येतत्प्रयुक्तं॥ अथगंगाधारणमप

कर्षहेतुरितिप्रलपतोवालिशान्यतिवो धयति ॥गंगा धृतानभवताशिवपावनीतिनास्वादितोयधुरइत्यपिकालकूटः ॥संरक्षणायजगतांकरुणातिरकात्कर्मेदृयंकलितमेतदनन्यसाध्यं ॥२५॥गंगाधारणंतावदनन्यसाध्यमिति॥भारतेभगिरथं प्रतिगंगावचनेनावगतं ॥करिष्यामिमहाराजयत्त्वयैतन्नात्रसंशयः॥ वेगंतुममदुर्धार्यंपतंत्यागगनाच्युतं ॥ नक्षमास्त्रिषुलो केषुकश्चिद्धारयितुंनृपा॥अन्यत्रविबुधश्रेष्ठान्नीलकंठान्महेश्वरादिति ॥रामायणेपितंप्रतिब्रह्मवचनेनावगतंगंगायाः पतनंराजन्पृथिवीनसहिष्यति॥तांवैधारयितुंवीरनान्यंपश्यामिशूलिनइतिभागवेतु ॥कोपिधारयतिवेगंपतंत्यामहीतले ॥नचेद्भूमितलंभित्वानृपयास्येरसातलंमितिपृष्टवतिगंगांप्रतिभगिरथवचनेनावगतं ॥धारयेद्भवतीवेगंरुद्रस्त्वात्मा शरीरिणं॥यस्मिन्ओतमिदंप्रोतंविश्वंशाटीवतंतुषिति ॥इदंचधारणंनकेवलंभगीरथपितामहोत्तारणमात्रार्थं किंतुसर्वो पकारकस्यागस्त्येनपीतस्यसमुद्रस्यपरिपूरणेनगंगावेगाद्विदारणपरिहारेणचजगत्संरक्षणार्थमइत्यपिभारते समधिगं तं।तत्रात्यारण्यपर्वेणागस्त्यनिपातस्यलोकपावनयासर्वोपकारकस्यसमुद्रस्यपरिपूरणोपायंप्रष्टुं भगवान्देवानाविब्रह्म णाभगीरथःस्वपितामहोत्तारणार्थंगंगामानेष्यतितयाचसमुद्रस्यपूरणंभविष्यतिविगतज्वरः ॥भवत्येक्तुंमितिप्र पंचित।।एवमनन्यसाध्यंगंगा धारणंजगत्संरक्षणार्थंशिवेनकृतंननुस्वस्यापिपावनीगंगेतिनद्धारणंकृतं॥यथाकालकूट २२

विषंमधुरमितिनास्वादितंकिंतुजगत्संरक्षणार्थमेव॥एवमिहापिनिदर्शनमात्रंकालकूटग्रसनोदाहरणं ॥तद्विजगत्संर क्षणार्थमितिशिवपुराणादिषुस्फुटमसिद्धमेव॥भागवतेपिनथोक्तं॥तत्रहिकालकूटप्रादुर्भावानंतरंतदुग्रतेगंतेजंदिशोदिश्यु पर्यधाविसर्पदुत्सर्पदसत्त्ववीर्यं॥भीताःप्रजादुद्रुवुरंगसेश्वराअरक्ष्यमाणाःशरणंसदाशिवमित्युत्कातत्तत्प्रसादनाय त्रिमूर्त्युत्तीर्णानस्त्रैगुण्यशिवाभिधानपरब्रह्मरूपपरमात्मातत्वनयातेनैकेलासवासिनःश्रीकंठकद्रस्वशिवविभूतिविशेष षस्यप्रजापतिकृतस्तोत्रेकालकूटसंहरणमिदंब्रह्मादीनामप्यसाधारणमतस्त्वदेकशरणागतभागताइतिविज्ञापयितुमुक्तं ॥नतेगिरित्रासिवलोकपालविरिंचवैकुंठसुरेंद्रगम्यं ॥ज्योतिःपरंयत्रकिलत्रिभिर्वयंसत्वेनयद्ब्रह्मनिरस्तभेदमिति॥गुणवि शेषोपाधिकृतब्रह्मविष्णुरुद्रभेदरहितंतत्संबंधिपरमशिवात्मकमित्यर्थः[illegible]भेदमित्यनेनोच्यते।स्वलोकोपकारार्थं शिवेनकृतंगंगाया धारणमपियदि[illegible]पद्याःस्यात्तदायच्छोचनिःसृतेत्यादिपंचाध्यायश्रवणसंतुष्यतांकूपमंडुकानां प्रलपितस्यकियानप्यवकाशःस्यादपिइदंतु धारणंभगिरथप्रसादितायोहैमवत्यापवंगंगायाःननुविष्णुपद्याइत्येतद्धिभज्य दर्शयति॥गंगापिनैवभवताजचर्मधारीन्मूर्धाधृतामधुरिपोश्चरणात्स्मरंति॥ किंतुप्रसादनपरायभगीरथायदत्तावरंशत धृतेःसदनात्पतंती॥२६॥द्विविधागंगाएकाहिभवतःकन्यकाब्रह्मलोकेभवंतिकेनचिद्दोषेनब्रह्मलोकाद्भूलोकंभगीरथेना

नीताअन्यात्ऊर्ध्वप्रसारितत्रिविक्रमरूपभगवच्चरणप्रभवात्यत्पधूःपतंती केनचिदंशेनव्योम्निस्थितादेवानांविहारोपयोगि
नी॥अंशांशवरेणमेरोरुपरिब्रह्मपुर्याश्चतसृषुदिक्षुप्रवाहानिर्लेनचतुर्धाविभक्तानि——प्राच्यादिसमुद्रंप्रविष्टा॥तथा
हिवामनपुराणे॥श्वेतोगौरपद्मपत्राक्षीनीलकुंतलमूर्धजा॥श्वेतमाल्यांबरधराकुटिलानामचोत्युमायाज्यायसींहिम
वतःसुतांप्रसूत्योत्कंदिवाकौश्वरुद्रैश्चवसुभिश्चतपस्विनी॥कुटिलाब्रह्मलोकंतुनीताशीकरभृता॥अथोचुर्देवताःस
र्वाःकिंप्रियंजायेनेष्यति॥पुत्रंतारकहंतारंब्रह्मन्यास्यामहेप्रिय॥ततोब्रवीत्सुरपतिर्नेयंशक्रातपस्विनी॥शार्वंधारयितुं
तेजोवराकिमुच्यतामिदं॥ततस्सकुटिलाकुद्वाब्रह्मणाप्राहनारदः॥तथापित्वेषभगवन्यथाशर्वंसुदुर्धरं॥धारयिष्याम्यहं
तेजस्तथैवशृणुसत्तम॥तपसाहंसुतप्तेनसमाराध्यजनार्दनं॥मयाहारस्यतद्दीर्घंधारयिष्येपितामह॥तथादेवकरिष्यामि
सर्वेशसमहामुने॥यस्मान्मद्वचनेपापेनास्तिते कुटिलेत्वयि॥तस्मान्मच्छापनिर्दग्धातमद्यापोभविष्यसि॥इत्येवंब्रह्मणा
शप्ताहिमवद्दुहितामुने॥आद्योमपिब्रह्मलोकंप्लावयामासवेगिनी॥नामुस्थितजलंदृष्ट्वाबबंधपितामहः॥ऋक्सामाथ
र्वयजुर्भिर्वाङ्मयेबंधनैर्दृढं॥सवध्वासंस्थितांब्रह्मन्नयेयंवरिकन्यका॥आपोमयीम्लावयंतिब्रह्मणोविमलांजटा
इति॥अत्रगंगैवकुटिलेतिनामांतरेणोक्ता॥एतैर्वैशैलराजस्यसुतेलोकनमस्कृते॥गंगाचसरितांश्रेष्ठाउमादेवीचराघवेतिरा २३

मायणेहिमवत्सुतायामुमाज्येष्ठायांकुटिलपदसंज्ञानेगंगापददर्शनात्॥अथज्येष्ठाकराःसर्वदेवतार्थंचिकीर्षया॥शैलें
द्रंवरयामासुर्गंगांत्रिपथगांनदीं॥ददौधर्मेणहिमवान्जनयंलोकपावनीं॥त्वच्छंदंपथगांगंगांत्रैलोक्यहितकाम्यया॥प्रति
गृह्यततोदेवास्त्रैलोक्यहितकारिणः॥गंगामादायवेगेनब्रह्मन्कृतार्थेनांतरात्मना॥इत्युदाहृत्यवामनपुराणोक्तकुटिलावृत्तांतस्य
गंगायामेधरामायणेसंक्षिप्यप्रतिपादनात्च॥अत्रहिदेवकार्यंचिकीर्षयेतिवरयामासुरितिधर्मेणहिंसोक्त्यातारकवधादिरू
पदेवकार्यंचिकीर्षयासेनान्युत्पादनायशिवस्यशक्त्यर्थंतदेमांकन्यांशिवस्यधर्मपत्न्यर्थंवृणीमहइतिवरशब्देनाधिकर्तृकक
न्यावरणप्रकारेणवरयामासुः सोपिकन्यादानधर्मेणदृढयित्वार्थंमतीपत्ये॥अतोवामनपुराणोक्तार्थछायाप्रतिपत्तिदृ
ढीनात्तामादायब्रह्मणेतिकंभिन्नुरित्यर्थोग्राह्यस्तदनंतरंब्रह्मणाप्राह्नारदीरूपमाकलिंत्रिपथगानदीमित्यनेनसूचिता॥इ
दंहिविशेषणंनप्राचीनवदपिरूपकीर्तनपरंभगवन्श्रोतुमिच्छामिगंगांत्रिपथगांनदीं॥त्रैलोक्यंकथमाकन्यगतानदीप
तिमिनिरघुनाथपृष्टेनविश्वामित्रेणत्रिपथगारू——मिवर्णनोपोद्घातेनास्याःकथायावर्ण्यमानत्वात्प्रोक्तवत्रिपथगारूपम
द्यावेदैवैरिदानींनीयमानत्वायोगाच्च॥किंतुप्राक्तिनसंज्ञामाश्रित्यैवंविशेषणं॥शैलैंद्राहिमवान्नामधातूनामाकरोमहान्।
तस्यकन्याद्वयंरामरूपेणाप्रतिमंभुवि।इत्युपक्रमादतिसौंदर्यातिशालितयाशीववीर्यधारणायविचित्यकन्यारूपेणब्र

म्हलोकान्नीतेत्येतार्थोयात्यः। अथत्रिपथगामितिनदीमित्येतदपिभाविनीसंज्ञामाश्रित्यनदीरूपप्राप्तिर्वामनपुराणोक्तरीत्या ब्रह्मशापेनत्रिपथगारूपप्राप्तिर्नदीरूपंप्राप्यब्रह्मलोकेस्थितायास्यास्भगीरथानुरोधाद्भुव्यवतरणेनपातालप्रवेशेनचेतित्व दितिधायत्रिपथगारूपप्राप्तेःपृष्टत्वात्तेवनवभिःसर्गैःपतिता। नदीरूपंप्राप्यब्रह्मलोकेस्थितिस्तुपृष्टत्वान्नप्रपंचिताकिंतु मिदृवत्कृत्यनत्रतत्रसूचिता॥यद्हिनाशिववीर्येनिपतितेसेनान्युसमिप्रलभमानात्ब्रह्मसर्गापंगतान्देवान्प्रति॥इमंमाकु शंगंगायस्यांपुत्रंहुताशनः॥जनयिष्यतिदेवानांसेनापतिमरिंदमं॥ज्येष्ठारौद्रंहुहुताजनयिष्यतितंसुतं॥उमायास्तु हुहुमतंभविष्यतिनसंशयइतिब्रह्मणोवचनेइयमाकाशगागंगेतिनिजलोकएवसन्निहिताकाशगतेनगंगानिर्दिष्टायच्च भगीरथेनगंगावतरणार्थंब्रह्माणमुद्दिश्यतपःकृतमित्युक्तंयच्चप्रसन्नेनब्रह्मणावरंवृतामतेनेयंवैष्णवतीगंगाज्येष्ठाहि भवतःसुतेतिब्रह्मलोकात्समागतेवंगंगेवनिर्दिष्टास्तेलिंगंगंगायानदीरूपप्राप्तिर्ब्रह्मलोकस्थितिश्चसूचिता॥एवंतावद्वामनपुराणोक्ताकुटिलागंगागौवेतिरामायणेनानुसारेणावगम्यते। किंचवामनपुराणएवाग्निमोधारयानुनोसारेणाप्यवगम्यते॥अग्नेर्हिशिववीर्येतिपीतंतंवन्हिंप्रस्कंदत्येवमुपारभ्यायते। यत्ततीतंहुताशनस्कन्नं शक्रंपिनाकिनः।तेनाक्रांतोऽभवद्ब्रह्मन्मंदरेजाहुताशनः॥वैश्वानरस्तदावर्णं ब्रह्मलोकजगामह॥सगच्छन्कुटिलेदेवींदृष्टेपथिपावकः॥तांदृष्ट्वाप्राह २४

कुटिलांतेजसपतत्कदुर्धरं॥महेश्वरेप्यसंत्यक्तंदहत्येतद्वरानने॥तस्मात्प्रतीच्छपुत्रोयंप्रवरोयोभविष्यति॥इत्युक्तो क्तासास्मिन्हाकृत्वास्वंवपुरुत्तमं॥प्रक्षिपोन्नसिमेप्राज्ञेत्येवमाहमहाप्रभा॥ततोविसृष्टंतेदेवीशंवतेजोत्यपूजयत्॥हुताशा नोपिभगवान्कामचारिजगामसः॥पंचवर्षसहस्रांते कुटिलाज्वलनोपमः॥धारयंतीतरागर्भंब्रह्मणःस्थानमागता॥तां दृष्टवान्कुजन्मा अंतर्वत्नींमहायशाः॥दृष्ट्वाप्रपच्छकेनाग्रंब्रह्मगर्भःसमाहितः॥सावाहशंकायनच्छुक्रंपीतंहिवन्हिना॥ तदाकेनतेनाद्यनिक्षिप्तंमयिसत्तमा।पंचवर्षसहस्राणिधारयंत्याःपितामहः॥गर्भस्यवर्त्ततेकालोभवद्येतकर्हिचित्॥तच्छु त्वाप्रभगवानाहगच्छत्वमुदयंगिरिं।तत्राक्षिगोजनशतंरौद्रंशरवणंमहत्॥तत्रैनंक्षिप्तकायेनविसर्जयगिरिसानुनि॥दशव र्षसहस्रांतेततोकालोभविष्यति॥सात्रुत्वाब्रह्मणोवाक्यंकुटिलातिरिमागमत्॥आगत्यगर्भंतत्याजशरवणेनवमहामुने॥ सातुसंत्यज्यतंबालंब्रह्माणंसहसाययौ॥आपोमयीब्रह्मशापात्संजाताकुटिलासतीतिएवंवन्हिविसृष्टशिववीर्यधा रणोक्तपपिकुटिलागंगेतिनिश्चीयते॥रामायणेपुराणांतरेचगंगायांवन्हिनाशिववीर्येविसृष्टमित्येककंठनप्रतिपा दनात्॥एवंतावदद्याहंभवतीगंगाब्रह्मशापान्नदीतंप्राप्ताभगिरथानुरोधाद्भुवंपातालंचप्राप्तासतीत्रिपथगाजाताप्र माणमुपपादितं। अन्यातु विष्णुपदीगंगासाकविदूर्ध्वमस्मारितत्रिविक्रमचरणांबुजसंप्रक्षालनार्थंसत्यलोकस्थित

ब्रह्मकमंडलुनिःसृतजलरूपावर्णिता ॥ अन्यत्रतच्चरणनिर्भिन्नोर्ध्वोऽण्डछिद्रनिःसृतबहिर्जलरूपात्रनिपातिता ॥ वामनपुराणे विष्णवेंघ्रिणाप्रसरताकटोहेभेदितेवरात् ॥ कुटिलाविष्णुपादांता ---कुटिलाततः ॥ तस्माद्विष्णुपदीत्येवं नाम्नाख्याविरभून्मुने इत्यूर्ध्वकपालपर्यंतप्रसरद्विष्णुप्रपदाग्रनिर्भिन्नाकुण्ठीभूतब्रह्मलोकप्रवहत्कुटिलाजलरूपोक्ता ॥ सैवापसंहारेत्रिविधजलरूपोपापर्यवस्यति सात्वविष्णुपादान्निर्गत्यैवमेरुपरिनिपत्यतद्देवसागरंप्राप्तेतिप्रतिपादिता । महाभारते सप्तमपर्वणि ॥ तच्छिद्रात्संहितात्तत्वपादद्वस्थनिम्नगा । ससारसागरंसारस्वरूपावनीसागरंगतेति ॥ कूर्मपुराणेतु ॥ साविष्णुपदीव्योमगंगाजानेत्युक्तः । अथांडभेदादपतच्छीतलंमहाजलं पुण्यकृद्भिश्चक्रुषे ॥ प्रवर्तनेचापि सरिद्वरातदागंगेत्युक्ताब्रह्मणाव्योम्निसंस्थितेति ॥ देवानांहिविहारार्थंकेनचिद्दर्शनेव्योम्निस्थिताअवशिष्टासागरेपतितेत्युभयानुरोधेनयोज्यं ॥ एवंचयोहिभवतीगंगासेवभगीरथार्थंशिवेनशिरसाधृता । नविष्णुपदीतिनवाशिशानामत्रशंकावकाशः । ननुविष्णुपदीशिवेनशिरसाधृतेत्यपिपुराणवचनेरवगम्यते । तथाहिविष्णुपुराणेपठ्यतेउर्ध्वोत्तरमृषिभ्यस्तुध्रुवोयत्रव्यवस्थितः ॥ एतद्विष्णुपदंदिव्यंतृतीयंव्योम्निभास्वरमित्यष्टमस्कन्धोक्तम् ॥ ततःप्रभवतिब्रह्मन्सर्वपापहरासरित् । गंगादेवांगनाजातामनुलेपनपिंजरा ॥ वामपादाब्जांगुष्ठनखवात्स्रोतोविनिर्गता ॥ विष्णोर्विभर्तिपा भक्त्याशिरसाहर्निशंध्रुवः ॥ ततः २५

सप्तर्षयोयस्याःप्राणायामपरायणाः । तिष्ठंतिसर्वान्वेमालाभिकृत्यमानाजटाजले ॥ वायोर्योगेसंततेर्यस्यापुनर्वितरशिशिरेऽहले भूयोधिकतरंकांतिंवहमानंददर्हरः स्वयं ॥ मेरुपृष्ठेपतित्वोर्ध्वंनिष्क्रांताशशिमंडलात् ॥ जगतःपावनार्थाययाप्रायात्तिचतुर्दिशं । सीताचालकनंदाचचक्षुर्भद्राचसंस्थिता ॥ एकैकाहिचतुर्भेदाद्दिग्भेदकृतलक्षणा । भेदंचालकनंदाख्यंयस्याःशैर्वोपिदक्षिणं ॥ दधारशिरसाप्रीत्यावर्षाणामधिकंशतं । शंभोर्जटाकलापाच्चविनिष्क्रांतास्तिशंकरात् ॥ प्लावयित्वादिवंनिन्ये प्रायापान्सागरात्मजान् ॥ मार्कंडेयपुराणेपि ॥ ध्रुवाधारंजगन्नद्याःपद्मनाभपदंमहत् । ततःप्रवृत्तापादेवीगंगात्रिपथगामिनि ॥ साप्रापिश्यक्रुधायोनिंसोमप्रधारमेभसा । सेवर्त्तमानार्थशिरसेवतिलोकपावनी ॥ पपातमेरुपृष्ठेचसावतुर्धाततोभवदित्युपक्रम्यसीतायाःपूर्वसमुद्रप्राप्तिमुक्त्वातथैवालकनंदाख्यादक्षिणंगंधमादनं ॥ रुपपादवनंगत्वानंदनंदेवनंदनं ॥ मानसंचमहावेगात्प्लावयित्वासरोवरं ॥ मानसाच्छैलराजानंरम्याद्रिशिरंगता ॥ तस्माच्चपर्वतान्सर्वान्दक्षिणायेक्रमोदिताः ॥ तान्तान्प्लावयित्वाभेप्राप्ताहिभवनंमहागिरिं ॥ दधार । दधारतत्रतांशंभुर्मुमोचवृषभध्वज ॥ भगीरथेनोपवासैस्तुत्याचाराधितोविभुः । तत्रमुक्तातुशर्वेणसधालक्षणोदधिं ॥ मयिवेशनिधाप्राप्तासातदातुभरी ॥ भगीरथस्यानुरथंस्रोतसैकेनदक्षिणमिति ॥ स्कंदपुराणेकेदारखंडे ॥ संकल्पेनैवनृपेवामनोभगवानजः ॥ पदैकेनमहीव्याप्तविष्णुनाप्रभविष्णुना । सर्व

स्वर्गाद्वितीयेनव्याप्तास्तेन महात्मना॥ सत्यलोकस्थितेनैव ब्रह्मणापरमेष्ठिना। कमंडलुगतेनैव अंभसाचावनेजने। तत्पा
दसंपर्कजलाच्चजाताषापापहामंगलमंगलाच॥ ययात्रिलोकीचकृतापवित्रायथावत्सर्वेसगणाःसमुद्धृताः॥ ययाकपर्दिन्यपरि
पूरितभ्रंत्राप्तोस्तदार्नांचभगीरथेन। महाभारते। विष्णोःपराङ्घ्रिशकमाक्रवाच्चसोमात्सूर्यान्मेरुतश्चविष्णोः। समागता
शिवमूर्धोहिमाद्रिमित्यूच्यते॥ वामनपुराणरामायणवचनस्वारस्यानुरोधेनब्रह्मलोकस्थितोहैमवतीगंगा भगीरथेना
नीतावरुग्रहार्यशिवेन धृताच॥ विष्णुपदान्निर्गतायाःहैमवतीजलेनापि मिश्रणप्रसादित्येतावद्वजंमतभेदोचारेणवि
ष्णुपदीशिवेन धृतासागरानपिपावितवतीतिविष्णुपुराणादिवचनात्सुदृढतन्नियोजनीयानि॥ कथमन्यथात्रिविक्रमा
वतारकालएवमेरौनिपत्यभुविप्रवहत्यांविष्णुपद्यांसत्यांभगीरथेनत्रिरिवाङ्गानयनंकृतमितिविष्णुपुराणएवोक्तंसंग
येत॥ ननुत्रिविक्रमावतारकालेनिर्गताविष्णुपदी ध्रुवलोकस्थिता सापभगीरथेनप्रसादिताप्रेरौनिपत्यदक्षिणस्यां दि
शिप्रवहतीशीवेनशिरसाधृताहिमवंतंप्राप्यसमृधाप्रस्रवतीतिकल्पयिष्यते। रामायणेतु किंविद्देशंपरित्यज्यकमावर्णिता॥
तस्मिन्नियमाकाशगंगेतिब्रह्मसेवार्थंब्रह्मलोकमागतायविष्णुपदिब्रह्मणायमितिमिर्दिष्टेतिचकल्पयिष्यतइतिचेन्नैवं॥
तस्छिद्रात्संदितातत्रेत्युदाहृतभारतश्लोकेविष्णुपदान्निर्गमनानंतरमेवविष्णुपद्याःशीघ्रंसागरप्रवेशस्योक्तत्वेन भगी २६

रथकालपर्यंतंध्रुवलोकेतदवस्थानकल्पनानुपपत्तेः॥ नचतदानेनविदेशेनभुविपतितासागरमेवप्रविष्टानभूलोकेप्रवहंतिस्थिता
अतोभगीरथकृतंतस्यास्त्रिदिवादानयनंसंघटतइतिवाक्यंभगीरथार्थमवतरंत्यास्तस्यामेरौनिपतनेनतत्रनिपत्यस्वतएवदि
क्प्रवहंत्यास्तत्तनवेगधारणार्थंशिवप्रसादनस्याकर्तृखेदेनननुक्त्यसंघटनात्॥ शिवमूर्द्धन्येवपतनेमेरौनिपत्यदक्षिणस्यांदि
शीप्रवहंतीविष्णुपदीशीवेनधृतेतिविष्णुपुराणादिसंघटनाभावात्॥ अस्मिन्पक्षेमेरौतन्निपतनोक्तिस्त्रिविक्रमावतारकाल
वृत्तांतविषयावाच्या॥ तदोमेरौनिपतितातताःप्रभृत्यद्यपर्यंतंभुविप्रवहत्येववर्तमानाजगतःपावनार्थायसाप्रयातिचतुर्दिशमि
त्युदाहृतविष्णुपुराणवचसावगतेतितस्यामिहसत्यांत्रिदिवादानयनार्थंभगीरथकृतयत्नस्यासंघटनाच्च तस्यतत्संघटनार्थं
मियमाकाशगंगेतिरामायणवचनस्वारस्यलाभार्थंचब्रह्मलोकस्थितोहैमवतीभगीरथेनकेनापिप्रसादितोशीवेनधृतसाग
रानपिपावितवतीतद्भेदोपचारेणचतद्वृत्तांतस्यैवतस्यांविष्णुपुराणादिषुवर्णनमित्येवंकल्पनंयुक्तंध्रुवलोकाद्भगीरथेनवि
ष्णुपद्यानीतेतिकल्पनेपित्रिविक्रमावतारकालमारभ्यमेरौनिपत्यभुविप्रवहत्यांशिवधृतत्वादितद्वृत्तांतवर्णनस्यतद्भेदो
पचारमूलत्वकल्पनावश्यंभावादित्यलंप्रपंचेन॥ नन्वस्त्येवमेतत्तथापिविष्णुपदिनिर्गमसमयेतन्मार्गेस्थितोहैमवतीत
यामिश्रिताःभूत्तमःपावनीतिसाशिवेनमूर्द्धन्यधृतेतिशंकोहैमवत्याःशिवमूर्द्धसंबंधादेवातिपावनत्वप्रतिपादनेननिरस्य

ति। सापिलद्गपतितानितसांपवित्राजातातत्स्वदभिषेकजलोपमेति। स्वर्लोकवासिभिरनंतरमादनाघीयेमूर्धभिर्दधतितेच
रणोपस्पृष्टं॥ ६०॥रामायणेविश्वामित्रवचनं॥आकाशादवतद्रामशिवेशिवशिरःस्युत॥ अचिंतयच्चस्तंदेवीगंगापरमदुर्धरा॥
विशस्यहंहिपातालंस्रोतसागत्यशंकरं॥तस्यावलेपनंज्ञात्वाकुद्धस्तंभगवान्हरा॥तिरोभावयितुंबुद्धिंचक्रेत्रिनयनस्तदा॥सात
स्मिन्पतितापुण्यापुण्येरुद्रस्यमूर्द्धनि॥हिभवत्प्रतिमेरामजटामंडलगह्वरइत्युक्तस्तत्रैवर्षिगंधर्वावसुधातलवासिनः॥
भवागपतितंतोयंपवित्रमितिपस्पृशुः॥ शापात्प्रपतितंपाद्यंचगगनाद्वसुधातलं॥कृत्स्नात्राभिषेकंतेवप्रवृत्तंकल्मषाः॥धुत
पापाःपुनस्तेनतोयेनाथस्वप्नास्वता॥पुनराकाशमाविश्यस्वर्लोकान्प्रतिपेदिरेइत्युक्तं। अत्रहिशिवेशिरस्युतेतिपुण्येरुद्रस्यमूर्ध
नीतिचशिवपुराणशब्दान्वांशिवशिरसःपरममंगलत्वंपरमपवित्रतंचोत्कानतत्संबंधाद्दृगंगायाःप्राप्तं अतिशयःभगवांपति
तंतोयंपवित्रमितिपस्पृशुरितिस्पष्टमेवोक्तं॥ अयमेवार्थःकूर्मपुराणेपिदृष्टुंधागंगामाहात्म्यप्रतिपादनानंतरंसंक्षेपेणकथितः
पवित्राणांपवित्रंचमंगलानांचमंगलं॥महेश्वरात्परिभ्रष्टासर्वपापहराशुभेतियेमूर्धभिर्दधतितेचरणोपस्पृष्टमित्यनेनभगव
तोदितःकश्चिदर्थःस्मारितस्तत्रहिशिवापदेशोप्यशिवोमतोन्यत्तज्जनप्रियइत्यादिपरुषोक्त्याशिवंदूषितवंतंदक्षंप्रतिदाक्षा
यण्याःसोल्लुंठनंवचनंकिंताशिवाख्यमशिवंनविदुस्त्वन्येब्रह्मादयस्तमवकीर्यजटाःश्मशाने॥तन्माल्यभस्मनृकपाला

वसन्पिशाचैर्यमूर्द्धभिर्दधतितच्चरणोपस्पृष्टमितिशिवःश्मशानवासी॥ भूत्वातत्रविकीर्णानिमाल्यभस्मनृकपालानि
धृत्वापिशाचैःसहस्थितोनाममात्रेणशिवश्चारिश्रेणत्वशिवएवेत्येतत्सर्वमेकएवजानात्यजब्रह्मादयोनजानंतिकिंचैवब्रह्मादय
यःशिवचरणनिर्गलितंतत्स्नानधूल्यादिकमपिपरमपवित्रमितिशिरोभिर्वहंतीतिश्लोकार्थः॥एतेनहिभागवतएवशिवचरणसं
लग्नधूल्यादिनामपिपरमपवित्रत्वंवचनेनतन्मूर्धसंतोप्यधिकमाहात्म्यंसूचितं॥अतोरामायणाद्युक्तेसन्मूर्धसंसर्गादेवगंगायाःप
रमपवित्रेऽभिमतेपिप्रधानप्रतिपाद्यभगवन्महिमस्फूर्त्यर्थंयत्रक्वोन्वनिस्तेत्यादियत्किंचित्तत्रोक्तमितितत्रादरोमनीषि
भिःकार्यः॥भगवतोहिप्रकृष्टंसत्त्वमनुसरेणकृष्णावतारमहिमानमेवप्राधान्येनप्रत्यापनीयंमनसिनिधायावतारानुक्रमणे
एतचांशकलाःप्रोक्ताःकृष्णस्तुभगवान्स्वयमितिरघुनाथाद्यवतराणांभगवदंशत्वेसतत्कृष्णस्यपरिपूर्णतारूपावतारत्वमु
क्तं॥तदुहहात्मनःकेशादितिभारतविष्णुपुराणादिवचनविरुद्धंब्राह्मणपुत्रानयनप्रस्तावावगतभगवत्तत्त्वविरुद्धंच॥तन्तु
प्राधान्यांशिकृष्णावतारस्तुत्यर्थत्वेनकथंचिन्नेतव्यएवमिदमपि॥किंचभागवतएवतत्तद्देशार्थोक्तेनयाशिवस्यविष्णो
श्चधर्मिग्राहकमानसिद्धःपरापरभावः॥तथाहिभागवतेपंचमे॥तस्माद्देकेनमनसाभगवान्सात्वतांपतिः॥श्रोतव्यःकीर्तित
व्यश्चध्येयःपूज्यश्चनित्यदेत्यादिकमुक्त्वाकोसौभगवानित्याकांक्षायांसत्त्वंरजस्तमइतिप्रलयसर्गगुणास्तेषुक्रमेणपरःपुरुषएकइ

हास्यधत्ते॥ स्थित्यादयेहरिविरिंचिहरेतिसंज्ञाःश्रेयांसितत्रखलुसत्त्वतनोर्नृणास्युरिति श्लोकेनत्रिमूर्त्यैतर्गतविष्णुमेवश्रेयस्क
रत्ववोदनप्रागुपक्षिप्तनियतभजनीयत्वोपपादनपूर्वकंभगवंतंविधायप्रेजिरेमुनयोयाग्रे भगवंतमधोक्षजं।सत्वंविशुद्धंक्षेमा
यकल्पतेनेतरावियेहितिसात्विकत्वेनैवतस्यपूर्वैरप्युपास्तितत्मुक्तातत्सेवविविधप्रशंसापूर्वकंजगद्धेपौरुषंरूपंभगवान्महद्
दिभिः।संभूतंषोडशकलमादौलोकसिसृक्षया। यस्यांभसिशयानस्ययोगनिद्रांवितन्वतः।नाभिह्रदांबुजादासीद्ब्रह्माविश्व
सृजांपतिः।यस्यावयवसंस्थानैःकल्पितोलोकविस्तरः।तद्वैभगवतोरूपंविशुद्धंसत्वमूर्जितंमिति।सत्वप्रधानरूपमुक्तापक्ष्मा
नावताराणांनिधानंबिजमव्ययं।यस्यांशांशेनसृज्यंतेदेवतिर्यङ्नरादयइति तदेवरूपंवैष्णवंमूलरूपमित्युक्तं॥अनेनावि
मूर्त्यैतर्गतोविष्णुरेवपरंविष्णुतत्वंसएवभगवतेवैष्णवपुराणेचस्वमाधान्येनप्रतिपाद्यइतिस्फुटीकृतं॥एवंचसत्वाद्येकैक
गुणप्राधान्याद्धित्येननिरस्तसात्विकादिभेदंब्रह्मायामोहितमेतेषांसमष्टिरूपंसगुणंब्रह्मयस्यांशाभूताइमेभुतामित्रेयोप
निषदिमोहखलुवावास्मराजसांशोसौसयोयंब्रह्मा अथयोहखलुवावास्यतामसांशोसौसयोयंरुद्रोणयोहखलुवावास्यसा
त्विकांशोसौशयोयंविष्णुरिति तस्मादवरंविष्णुतत्वमित्यंगीकृतंभवति॥अतएवस्यप्रपंचनार्थेभागवतंतस्मिन्विष्णु
पुराणेप्रतिपाद्यस्यविष्णुतत्वस्यपरब्रह्मावरत्वमुक्तं॥तत्रहिब्रह्मविष्णुशिवाब्रह्मअधानाब्रह्मशक्तयः॥ततश्चदेवामै २८

त्रेयन्यूनादक्षादयस्ततइत्यादिनाब्रह्मादिस्थावरांतस्यकृत्स्नस्यप्राणिजातस्योत्कर्षापन्नपरब्रह्मशक्तित्वमुक्तातद्वंतरंसपरः
सर्वशक्तीनांब्रह्मणःसमनंतरइतिपुराणप्रतिपाद्यस्यविष्णोःसकलब्रह्मशक्त्युत्कृष्टत्वमभ्युपेत्यापिब्रह्मावरत्वमुक्तं।एवंत्र
याणांब्रह्मशक्तित्वोक्त्याविष्णोर्ब्रह्मावरत्वोक्त्याचत्रिमूर्त्युत्तीर्णंयद्ब्रह्मास्तीतिस्फुटितंकृतंशिवएवेतिविष्णुपुराणस्याप्याकू
तं॥शक्तयोब्रह्मविष्णवाशमुक्तिमुक्तिफलप्रदाः।सर्वेश्वराःसर्वविद्याःशाश्वतानंदभोगिनः॥अन्याश्चशक्तयोदिव्याःसंतितत्र
स्तुहस्रशः॥इड्यंतेविविधैर्यज्ञैःशक्रादित्वादयोमराः।सर्वासामेववाशक्तीनांब्रह्मविष्णुशिवात्मिकाः॥प्रधानाःसंस्मृतादेवा
शक्तयःपरमात्मनः॥आद्याःपरस्ताद्भगवान्परमात्मासनातनः।गीयतेसर्वशक्त्याल्पाशूलपाणिर्महेश्वरइतिकूर्मपुराणेवचनेने
कार्यादवसीयते॥विष्णुभक्त्युत्कर्षसिध्यर्थंप्रवृत्तेतत्रतत्रस्फुटीकृतं॥उक्तएवामृतमथनप्रगीरथचरितादिप्रस्तावेचनन्य
साध्यमितिशिवेनकृतंकालकूटभक्षणंगंगाधारणमित्याद्यपितत्रत्यमुक्तंशिवस्यविमूर्त्युत्तीर्णसात्विकादिभेदरहितमायोपहित
परब्रह्मरूपत्वंभागवतएवतत्रव्यवहृतंयथोक्षमस्कंधे॥नतेगिरित्रेतिप्रागुक्तश्लोके॥एवंचगुणवृत्तास्वशक्त्यास्यसर्गाद्धि
त्यादनंप्रभोः॥यत्सेवकास्तेवरुणब्रह्मविष्णुशिवादिभिधाः॥त्वंब्रह्मपरमंगुह्यंसदसद्भावभाविनं॥नानाशक्तिभिराभासित्वमात्मा
जगदीश्वरइत्यादिभगवद्वचनानियद्यपिशिवविभूतिभूतनीलग्रीवाहितरुद्राद्युद्देशेनप्रवृत्तानितथापिप्रत्यासत्त्यातिशयेनशिवा

भेदद्दष्याषवृत्तानिइत्येवयोजनीयंएवंनेवविद्भोदृष्टान्यप्यंनादृशानिवचनानियोजनीयानि॥शिवस्यत्रिमूर्त्युत्तीर्णस्यभारतेशि
वपुराणेषुचैककंजेनरुद्रप्रसिद्धत्वात्॥परारुरोपपुराणेसर्वेषांपुराणानांयथायोगंसाक्षात्परंपरयावाशिवपर्यवसानप्रतिज्ञानं
तरंशैवपुराणानांसाक्षात्शिवप्रतिपादकत्वंसंहाररुद्रवर्णनद्वाराशिवपर्यवसानंचोत्कांवैष्णवानिपुराणानिसमस्तानिम
हामुने।त्रिमूर्तिनांहरेर्नाम्नामूर्त्यातस्यपरंपदं॥प्रवदंतिपुराणोद्दब्राह्मेचैवान्यादिशेत्युक्तत्वाच्चवैष्णवानांत्रिमूर्तिउ
त्तीर्णपरब्रह्मास्तित्वाभ्युपगमेअथर्वशिरःशिखोपनिषद्दोश्रुतितदुपबृंहणपुराणवचनन्यायानुसारेणतद्
सगणंब्रह्मशिवःपर्यवस्येदितिभिधात्रिमूर्त्यंतर्गतःसात्विकोविष्णुरेवपरंब्रह्मत्रिमूर्त्युत्तीर्णपरंब्रह्मनास्तीतितत्प्रतिपा
दकश्रुतिपुराणान्यप्यानयनयन्तस्य।एकंत्रिधाविभक्तंत्रितयसमधिकंतत्वमीशास्त्रयस्तेविष्णुब्रह्मशिवाख्यामूर्तिरीशेप्रभवनि
यमःकल्पभेदात्त्रयाणां॥इंद्रादीनामित्यस्याभिजनकृतवशादीश्वराणांप्रवाहःस्यादेकस्येश्वरत्वेप्रतिफलनमिवेत्यादि
चैवपरास्तमितितरीयसंग्रहश्लोकस्यचदर्शनाच्च॥एवंचभागवतविष्णुपुराणयोर्धर्मिग्राहकमानसिद्धस्यपरापरभावस्य
व्यत्ययकल्पनायोगात्तद्विरुद्धंसर्वंपरांसार्थखेननेयं।एवंपुराणांतरेष्वपिकिंतत्त्रिविक्रमरूपप्रदित्यामाविर्भूतेनयेनभग
वतादर्शितंतद्विष्णुद्वादशादित्यमध्येसर्वत्रापिपुराणेतिहासेषुविगानेनपरिगणितः॥तेषांचद्वादशादित्यानांसूर्यकला २१

वेशेनस्वस्वमासाधिकारनिर्वाहकत्वंकूर्मपुराणेवर्णितं॥सर्वात्मासर्वलोकेशोमहादेवःप्रजापतिः॥सूर्यएवत्रिलोकस्यमूले
परमदेवतं॥द्वादशान्येतथादित्यादेवास्तेत्यधिकारिणः॥अरुणोमाघमासेतुसूर्यःपूषातुफाल्गुने॥चैत्रमासिचवेदांगोधा
तावैशाखवतापनः॥ज्येष्ठेचैवतुदेवेंद्रेआषाढेसवितारविः॥विवस्वान्श्रावणेमासिप्रोष्ठपद्यांभगःस्मृतः।पर्जन्योश्वयुजेत्व
ष्टाकार्तिकेमासिभास्करः॥मार्गशीर्षेभवेन्मित्रःपौषेविष्णुःसनातनइतिअत्रमासाधिकारिषुसूर्यद्युजीवरूपप्रधानसूर्यो
शोवेशोमविवक्षितःगविष्यास्तादंशावेशनकार्यकर्तृत्वान्न्यायेनात्॥किंतुतदंशवर्णनेशिवसूर्यांशावेशः॥अतएवमहादेवःप्रजा
पतिरित्यपक्रांतं।एकोदेवोमहादेवोभास्वान्सर्वासान्महेश्वरः॥भासतेवेदविदुषांश्रीलक्ष्मीवःसनातनइत्युपसंहृतं॥ऋग्वेदांतो
घुएवरुद्रोमहादेवःकपर्दीचघृणिर्हरः॥आदित्योभगवान्सूर्योनीलग्रीवस्त्रिलोचनः॥आधीयतेसहस्रांशुःसामगाध्वर्युहोतृ
भिरित्यादितत्रतत्रवर्णिता।तत्रसूर्योपस्थानार्थमुपदिष्टसूर्यस्तोत्रेमूलमृग्यनुसारेणशिवरूपतयैवसूर्यस्यस्तुतिःकृता
॥भूर्भुवस्वरस्तस्मैनोंकारःसर्वरुद्रःसनातनः॥पुरुषःसन्महोवस्त्वाप्रणमामिरुपदिना।त्वमेवविश्वंबहुधाजातंयज्जायतेच्च
यत्॥नमोनिजायरुद्रायत्वामहंशरणंगतः॥प्रपद्येनमस्कृत्यंनमोमीढुष्टमायिने।नमोनमस्तेरुद्रायत्वामहंशरणंगतः॥हिरण्य
बाहवेतुभ्यंहिरण्यपतयेनमः।अंबिकापतयेतुभ्यंउमायाःपतयेनमः॥नमोस्तुनीलग्रीवायनमस्कृत्यंपिनाकिने।विलोहिताय

भर्गायसहस्राक्षायवेनमः।नमस्याभिज्योतिर्ब्रह्माणंत्वांपरामृतं॥ विभवंपरुषपतिंभीमंनरनारीशरीरिणामिति॥ यत्तुविष्णु
पुराणेआदित्यक्रतुगंधर्वाप्सरसः प्रभृतीन्सप्तविधान्मासाधिकारिणोमैत्रेयस्यंदने भानोः सप्तभासाधिकारिणइत्युपक्रम्य
मासेष्वेतेषुमैत्रेयवसंत्येवेक्रमसप्तकाः॥ सवितुर्मंडलेब्रह्मविष्णुशक्त्युपबृंहिताइत्यंकंनेतत्तयाविष्णुशावेशाभिप्रायंकिंतुआ
दित्योवाएषएतन्मंडलमित्यादिश्रुतौमंडलेपुरुषार्त्विरूपतयाप्रभ्रिःपूर्वाण्हेदिविदेवइयतेइत्यादिमंत्रैःपूर्वाण्हादिदिनेहनु
तयाचयादेवैत्रयीवर्णितातत्कृतसाहायकाभिप्रायंसत्वविष्णुःस्थितिःस्थित्योजगतःपालनाद्यतः॥ऋग्यजुःसामभूतोंतः
सवितुर्हिजतिष्ठति॥मासिमासिरविर्योयस्तत्रतवहिसापण॥त्रयीमयीविष्णुशक्तिरवस्थानंकरोतिवैइतितत्रैवाग्नेतथाचि
वरणात्॥ इदैतुयएषोंतरादित्येहिरण्मयःपुरुषइत्यपक्रम्यनमोहिरण्यबाहवेहिरण्यवर्णायहिरण्यरूपायहिरण्यपतयेंबि
कायउमापतयेनमोनमइत्यंतयातेत्तरीयोपनिषदिअसौयस्ताम्रोअरुणइत्यादिश्रुतिगणेस्तदनुसारिभिरुपबृंहणेश्चसिद्धं
शिवस्यसूर्यांवर्यामितयासाप्राधिकारिकावेशंनिरोद्धुंमार्हे॥ अतोयदावेशाद्यस्यस्वकरणसामर्थ्यमवगतंतेनतस्यतदपे
क्षयोत्कर्षोनसंगच्छतिअतस्तद्विरुद्धंसर्वंतत्तत्प्रशंसार्थतयायथाकथंचिन्नेयमितिसिद्धं॥ अथशिवस्यबाणाहवेपराज
यंजल्पतःप्रतिबोधयति॥उज्जृंभणेयदुकुलाधिपतेरुदास्यबालेंदुशेखरपुराकिलबाणमुद्दे॥एतावताविकलतांतवविं २०

मस्यलोकरक्षाःकथंविदीश्वरकल्पयंति॥ २८॥ननुकृष्णस्योज्जृंभणेशिवस्योदासीन्यमात्रंननुपराजयइत्येतत्कुतोवगम्यत
इत्याकांक्षायांमर्यादापतिभिरित्याहुः॥ओजीवसांप्रसवीवरःस्थिरकार्मुकोसिभीमोसिसर्वजगतामविलेश्वरोसि॥इत्यंतत्रयुक्ति
शतैःपठ्यमानेकिन्नामजल्पतिजनःशिवकिंचनः॥२९॥कल्पांतरद्रुहिणकोटिकरोटिपालाप्रस्तागतागकमठागवराह
शृंजैः॥ अकल्पपवतवमंगलविग्रहस्यसर्वोत्तरंतदबलंकिमुनव्यनक्ति॥३०॥यस्यांशकैःशरभशैरववीरभैद्रैरामर्दिताह
रिविरिंचिपुरंदराद्याः॥विश्वेशहंतवविक्रमभूरिभावेसार्द्धंतएवसमुपादृतेकिमन्ये॥३१॥कल्पद्रुमाहरणषट्पुरशास
नादियद्दत्तयेवयदुराजतनिष्ठशक्त्याःसस्मिंस्तवप्रतिहतिंतवपौरुषस्यभूर्वोदितांबवसणेवकथंसहेत॥३२॥नवाऽजीगो
द्रान्तदस्तिसर्वस्मादप्योजीयस्त्वंशिवस्यश्रुतंनमउग्रायचभीमायचेत्यादौनिरूपणेभीमबाह्यानांकलजगद्भयंकरत्वं
श्रुतं॥ तत्सर्वतोबलवत्त्वमंतरेणवशंभवति॥तथासर्वैश्वर्यसंपन्नःसर्वेश्वरश्चेत्यादौश्रुतंसर्वनियंतृत्वमपितदंतरेणनसंभ
वति॥किंचातीतानागतकल्पयिलामहाविष्णुनुपसंहृत्यतदीयकपालमालाधारणंतद्वत्स्मान्नृलेपनंकूर्मावतारमुपसंहृ
त्यतदस्थिधारणंवराहावतारमुपसंहृत्यतच्छंगधारणंचततस्तताबलवत्त्वमंतरेणनसंभवति॥ अपिशशिवकलाविर्भाव
वत्तयाशिवांशभूतैःशरभशैरवीरभैद्रैर्नारसिंहावतारोपसंहारः॥ पितामहपंचमशिरश्छेदःदक्षाध्वरेविष्णुदेवेंद्रादिसकल

देवावलेप ध्वंसभ्रकृतः सर्वमेतत्के मुनि फन्यायेन शिवस्यसर्वतोबलवत्तरत्वं नितरांस्थापीकरोत्येव ॥ अपिचशिवमाराधयतत्यसा दृतएवकृष्णेनपारिजातहरणसामर्थ्यलब्धमितिषट्पुरवधेनिकुंभयुद्धेगच्छन्नतयायुद्ध्यमाननिकुंभंदृष्ट्वाप्रतियोद्धुमश क्नुवताकृष्णेनस्वप्रतिष्ठितस्यविल्वोदकेश्वरनाम्नःशिवस्य ध्यानादेवमायाविनंनिकुंभंदृष्ट्वाप्रतियुद्धंकृतमित्यादिहरि वंशेऽपंचितं ॥ अथशिवस्यतत्रपराजयवचनमत्यंतामहास्यमेव ॥ अत्रलेखनीयात्युपाख्यानानिविस्तरभयान्नलि खितानि शिवपुराणादौप्रसिद्धानिद्रष्टव्यानि आस्तामियमर्थोपपत्तिकथा ॥ युद्धार्थंभागसंतदोदासीन्यातत्रहेतुरित्याकांक्षायांतत्रहेतुनाह ॥ शंखस्त्वयाशातमखस्यरिपुःमयुद्धमभ्यर्थयन्नस्करभावविलापनाय ॥ मत्तुल्यएवसम रेमरमस्पर्द्धोष्णांकंडुभरोत्यमनिशंरपनेष्यतीति ॥ ४३ ॥ देव्यावदेववचनंतन्निर्वहंत्यासंपादितासमरसंयदुषानि दाना ॥ यत्रत्वयाहरिमुरेवनभुजावलेपव्यच्याय्यसेषनिहतःप्रथमाधिपत्ये ॥ ४४ ॥ शैलीचवेसमुदिताशिरखंडचूडभ कंविभावयसियद्वतोधिकंबं ॥ आदायचक्रमभिदिव्यनदीतनूजंयामेवमोघ्यनुससारयदुप्रवीरः ॥ ४५ ॥ दत्तंचशौर्यम धिकंभवतेवतस्मैतच्चन्महेशकलयापितपालयेथा ॥ आशंक्यवाक्यमखिलंभवेतामृषिवेदागमेद्यपिजना शिवमुखा भवेयुः ॥ ४६ ॥ एतैस्तथागिरिशहेतुभिरत्रतस्मिन्नाविष्कृतंकिमपितत्सहजंननेतजः ॥ कामांधकत्रिपुरकालजलंधराद्ये

र्यस्मिन्दरमकटितेशलभत्वमापुः ॥ ४७ ॥ ॥ हरिवंशेतावत् दोःसहस्रकंडुभरेणयुद्धमवितरामभ्यर्थयमानोःत्यंतदर्पो बाणःशिवेनवरदानव्याजेनगर्वशांत्यर्थंशमइतिसूचितं ॥ ततःसहस्रभगवानवृषीदृषभजः ॥ भविताबाणयुद्धंतेवरादत्तस्थ णुरात्मन ॥ ध्वजस्थास्यतवाभग्नंबलंतत्प्रभविष्यति ॥ स्वस्थानेस्थापितस्याथतवसायुद्धंभविष्यति ॥ अत्रमहसेत्यनेनवरदानव्या जेनयुद्धंप्रार्थ्यमानस्यामहत्तितेतत्प्रायुद्धंगृहस्थापितमथाध्वजपतनरूपदुर्निमित्तोहभानंतरंयुद्धंभविष्यतीत्युक्त्या त्वमाविनियुद्धेवस्यावश्यंपराजयोभवतीतिसूचितं ॥ भगवतेत्यमर्षःस्पष्टएवः बाणःपुत्रवात्सल्येबलेरासीन्महात्म नः ॥ सहस्रबाहुर्योद्धृणांडरोनाथवन्मृधे ॥ भगवान्सर्वभूतेशःशरण्योभक्तवत्सलः ॥ वरेणवेदयामासवरेन्यैरुराधिपं ॥ सपकराहगिरिशंयत्रेत्तंप्रेक्षद्दुमरः ॥ किरीटेनार्कवर्णेनसंस्पृशंस्तत्पदांबुजं ॥ ॥ प्रणमेतांमहादेवंलोकानांगुरुमीश्वरं ॥ पुंसामपूर्णकामानांकामपूरामगं श्रियं ॥ दोःसहस्रंतयादत्तंवरेणावरदेभवत् ॥ त्रिलोक्यांप्रतियोद्धारंनलेभेत्वद्भुजेसमं ॥ कंडूत्यानिभृतैर्दोर्भिर्युयुत्सार्दिगजावहं ॥ यथथाचूर्णयन्शैलान्प्रणावस्तेभदुद्रुवुः ॥ तच्छ्रुत्वाभगवान्रुद्रःकेतुस्तेभ ज्यतेयदा ॥ त्वदर्पघ्नोभवेन्मूढसंयुगेयत्समेनहीइति ॥ विष्णुपुराणे ॥ बाणेनापिप्रणिपत्याग्रेमैत्रेयाहविलोचनं ॥ देवबाहु सहस्रेणनिर्विण्णोस्म्याहवंविना ॥ कश्चिन्ममेदृशंबाहूनांसाफल्यजनकोरणः ॥ भविष्यतिविनायुद्धं भाराय ममकिंभुजैरि

तिपृष्ठवंतंबाणंप्रतिशिववचनं॥मयूरध्वजश्चमप्राप्तेयदाबाणोभविष्यति॥पिशिताशिजनानंदंप्राप्स्यसेत्वंतदारणं॥ततः
प्रणम्यमुदितःशंभुंप्रणम्ययथौगृहान्॥समग्रंध्वजमालोक्यतुष्टोहर्षंतरंययाविति।नन्वेवंसतिकोऽयंकिमप्यनुचितेवि
षयेनदृष्टमितिपूर्वोक्तविरोधः किंत्वल्पेतोधिकंकोऽयंयद्बाणो।पिनामशाप्यतेमत्प्राजनिमित्तंशिवशक्तिपरिपूर्णस्वरूपः प्र
सादितेनशिवेनपुत्रत्वेनपरिगृह्यस्कंदानुजोयमितिदेवैःसमर्पितः स्कंदेनाप्यनुजत्वेनोपलालितइतिहरिवंशादवोक्तं॥
ततश्चयदिनाम्युद्भार्थनाऽनुचितातदामेवंवरंवृणीष्वेतिबुध्युपदेशादेवपुत्रःप्रणम्ययुद्भप्रार्थनासमयेशा
पोदातुमुचितः॥ततश्चविष्णुनास्वप्नकृत्यप्रार्थितंददतोबलेः च्छत्रप्रणाम धनंमकुटंततोस्यनकोपिविशेषः॥तद्वदेवतत्
कर्मानुसारिणादेवेनमकृतमितसेवायमपिपरिहार्योजातइत्यशंक्यततोविशेषप्रदर्शनार्थंशापप्रयोजनमाह।अस्करभावावि
लापनायेति॥अयमाशयः॥येऽयंशिवेनसारागपत्यभावंवाहतेनतेषांस्वस्यशौर्योदिनविस्मयः॥शिवस्यसन्निधावस्यवचनं
वतिमर्यादा॥अतएवस्तोषुष्टिकेपर्वणियोरशांतनानाविधाकारानतिभीषणानानाविधायुधादिधरान्शिवपार्षदान्प्रस्तु
त्योक्तं।कामकारकरःस्वैरीलोक्यस्येश्वरेश्वरः॥नित्यानंदाःप्रमुदितावाणीशावीतमत्सराः॥आयाष्टगुणमैश्वर्ययेनयो
तिस्मविस्मयं॥येषांविस्मयनेनित्यकर्मभिर्भगवान्भवः॥मनोवाक्कायनिरतान्यातिपुत्रानिवोरसान्।।श्रुतेनब्रह्मचर्य ३२

णतपसाचदमेनच॥येसमाराध्यशूलांकंतत्सायुज्यंसमागताः॥यैरात्मभूतैर्भगवान्पार्वत्याचमहेश्वरः॥सर्वभूतगुणैर्मुक्तैर्भू
तभव्यभवत्प्रभुरिति॥एवंचसाक्षात्पुत्रःसन्नप्यनुचितेप्रवृत्तोबुध्युपदेशंनगृह्णातीतियदिविस्मयस्तदातदनुचितनिग्रहेणा
पिसततोनिवर्त्तनीयइतिनीतिः॥अयंबाणःकेवलंबुध्युपदेशेनततोनिवर्त्तनीयइतिहीतिशिवेनबाणवचनेरेवागतं॥ह
रिवंशेहि असक्कृन्निर्जितादेवाःसिद्धःसहमरुद्गणः॥मायाबलमदोत्सिक्तास्त्वमैन्येनबलाश्रयात्॥तेपराजयसंत्रस्तानिराशा
मत्पराजये॥नाकपृष्ठमुपागम्यनिवसंतियथाकृतं॥सोहंनिराशोयुद्धस्यजीवितंनाद्यकामये॥।अयुध्यतांवृथात्यर्थंबाहू
नांधारणंमम॥तद्रूहिममपुद्धस्यकश्चिद्रागमनंभवेत्॥नमेयुद्धंविनादेवरतिरस्तित्रसीदमेइतिशिवाद्राभासंशापंलब्ध्वा
स्वपुरंयासःप्रियमावेदयिष्यामिभवतोमनसोनुरूपमितिकुंभांडप्रत्युक्ताकिंविष्णुनावबद्धस्यपितुर्वधेमोक्षोपायंपुनस्त्वैलो
क्यराजप्राप्त्युपायंचशिवप्रसादाद्बुध्वानसीत्यादितेनपृष्ठस्तीश्चिरायुद्धापेक्षोहं भाविमहद्युद्धंलब्धवानस्मीत्युक्तवतेन
कुंभांडेनमंत्रिणाकीदृशोवरःप्रार्थितइतिसनिर्वेदमुक्तस्तदानीमेवस्वगृहस्थापितमयूरध्वजपतनंनदनंतरंभवप्रवृत्तरुधिर
वर्षादिमहोत्पातजालंचदृष्ट्वापिभावियुद्धनिश्चयेनदृष्टएवस्थितइतिप्रपंचनेनापिबुध्युपदेशायोग्यतिव्यक्तीकृतं॥बाणश्चपु
त्रत्वेनपरिगृहीतोबाहुसहस्रमेदात्मकमूलदुष्करभावान्निवर्त्तपार्षदमर्यादायाश्चानीया॥अतस्तदर्थंवरदानव्याजेनशापादत्त

इति॥एवंदेवस्यशापस्तावदेकोहेतुस्तदनुसारिभावियुद्धावश्यंभावनिदानंदेवीवचनमपिहेतुंतरं॥हरिवंशेपर्वबाणशापानंतरमुपपाद्यतेकदाचिदुमयासार्द्धंभगवान्हिंदुभूषणः॥विजहारनदीतीरंदिव्यकन्यादिसंवृतः॥ततोषाबाणदुहितासेवमानामहेश्वरीं॥ममाप्येवंभवेद्भर्ताकिमित्येवंव्यचिंतयत्। भावंतस्याःपरिज्ञायभवानिकरुणानिधिः॥उवेतवापिकल्याणिद्वारकायामतीभविष्यति॥वैशाखशुक्लद्वादश्यांयःस्वप्नेरमतेत्वया॥सएवपद्मवार्द्धैर्तातेभविष्यत्यविरादिति॥सातथेवतिथौतस्यांस्वप्नेदृष्ट्वाचसुंदरं॥क्रीडंतमात्मनोत्यापबभूवविरहातुरा॥चित्रलेखावासरवीतस्यास्तयास्वप्नोनिवेदितः॥पुनस्त्रिलोक्यांभ्रमितानूलिखितासमदर्शयत्॥अनिरुद्धेतुलिखितेदृष्टेबाणस्यकन्यकाभयेमवमयादृष्टोनिशायामित्युवाच्यतां॥तैरेवहेरकांगत्वासाक्षांतत्रनारदात्॥संप्राप्यतामसींविद्यांतस्यप्रासादमाविशत्॥तत्रानिरुद्धंक्रीडंतंमुक्तमस्त्रीशतैर्वृतं॥स्त्रियःसर्वाअपिनयेवाच्छादयदविद्ययाततस्यामेवतिथौस्वप्नेदृष्ट्वैवंतमुमापतिं॥तप्तंतमासक्तमनसंतद्भावांतंन्यवेदयत्॥ततस्तस्यानुमत्यासानेगृहीत्वाक्षणेनसा॥आनीयंबाणनगरंन्यविशद्दुर्षातिके॥उषातिमुदितागुप्तकन्यांतःपुरवासिना॥तेनैवरममाणासाचिन्हैर्ज्ञाताचरक्षिभिः॥ततःक्रुद्धेनबाणेनप्रेषितांस्तत्रसैनिकान्॥तदायुधान्येवादायप्रद्युम्नतनयोऽवधीत्॥ततोबाणःस्वयंगत्वायुद्धमायांततःश्रितः॥बबंधनागपाशैस्तंबद्धंतत्रन्यवेशयत्। नारदादिदमाकर्ण्यवृत्तांतंसहसाहरिम्॥ब

लप्रद्युम्नसहितोयोद्धुंबाणपुरंययौ॥तिष्ठेवमुषामूलेत्रयुद्धेदेवीवचनसाफल्यार्थंनागपाशबंधनानंतरमनिरुद्धेनस्वयोत्तोस्तत्रकृतसान्निधानायादेव्याःकराग्रस्फोटनेनवेदनापरिहारायसद्यःबंधनंशिथीलीकृतवत्यादुर्गावैरूप्यायासास्यापवेदेव्याः सद्यःकृष्णःसमागत्यबाणभुजाविछेदनेनगर्वपरिहार्यनागपाशान्दूरपलायितान्कृत्वाभार्यासहितंत्वामपिद्वारकांनेष्यतीत्यनुग्रहवचनसाफल्यार्थंचतस्मिन्युद्धेशिवेनौदासीन्यमवलंबितमित्यपरोहेतुः। अपिचशिवंचस्वस्मादपिस्वमुत्कर्षयन्स्वभावःकुबेरादिषुदृष्टःकृष्णानापिभारतयुद्धेअनायुधएवपांडवजयंतंनिकर्तयिष्यामिइतिनिजप्रतिज्ञामपहायतामायुद्ध्याहयिष्यामिइतिस्वप्नकस्यस्वप्नीष्मस्यप्रतिज्ञापरिपालिततताप्यनुसृजन्तत्तदीयोहेतुः॥अपिचैनाकेपूर्वरूपेणशिवंतपसाप्रसादितवतोश्रीकृष्णायानितरदुर्लभानेकवरप्रदानानंतरमपित्वत्समरंप्रभविष्यामिममाधिकइतिदत्तवरांतरंद्रोण्यपर्वणिप्रतिपादितंहरिवंशेपारिजातहरणसामर्थ्यलाभार्थंशिवंप्रसादितवंतंकृष्णंप्रतिपुरोनाकमाश्रित्यतपस्तप्यमकरोर्यद्॥तदाममवचःकृष्णसंस्मृत्यस्वैर्यमास्थहीत्यादिशिववचनेनदृढीकृतंचान्यहेतुः॥एवमेतैर्हेतुभिःशिवेनतदानीमौदासीन्यमवलंब्यस्वर्कायतेजोऽशेषापिनाविकृतःयस्मिन्नीषद्विकृतेकामांधकाद्यःशलप्रतामसाइत्यत्रशप्तस्तयेतिश्लोकेभक्ष्यर्सन्निपरस्मैपदप्रयोगस्यार्थयतेरात्मनेयदिक्वेपिबलतेरात्मनेपदमनिज्ञापकादितिवामनसूत्रतः साधुलंदेव्याचेतिश्लोकेसेवेत्य

स्यसोचिलोपे चेत्यादपूरणमितिसूत्रतःसाधुत्वं। अथस्मशानवासदोषस्यपरिहारमाह॥ दग्धेतवाक्षिदहनेनचराचरेस्मि
न्मत्वाखिलंभुवनमेवमहास्मशानं॥ तत्रस्थितिंविबुधनाथनवासहार्यांसंतःस्मशानवसतिंसमुदाहरंति॥४८॥ अत्रप्राग
वतवचनं॥ कामाध्वरत्रिपुरकालगणाप्येनेकभूतद्रुहःक्षपयंतस्कृतयेनतेन॥ नन्वेतकालइहमात्मकृतंस्वनेत्र।वन्हिस्फुलिं
गशिखया भसितंनवेदेति॥ नन्वेवंमहास्मशानवासस्यपरिहारोक्त क्षुद्रेष्वपि श्मशानेषुसंध्यानृतप्रसिद्ध्यनुपरिहारइत्याश
ङ्क्यायामाह॥ संध्यास्कभूतगणैरवभद्रकालीसंरंभजन्मजगदायदुपासनाया॥ तद्घोरचेष्टपितकाननभूमिषुनंतत्तादृशी
रीशतांडवमतितोषि॥४९॥ लिंगपुराणेसंध्यानृतस्यहेतुरुक्तः॥ पुराकिलापुरुषावध्यदारुकास्करद्वधार्थंशिवेनप्रेरिताजजल
तखेनसर्वत्रदयालुतयादारुकस्यकंदकलेपितद्वधविकीर्षयामलभमानाकेनचिद्दंशलेशेनशितिकंठंप्रविश्यकालकूटेसहस्रांश
मात्रंपीत्वानिर्गतातिक्रूराभद्रकल्पभवत्॥ सादारुकास्करंनिहत्यभूतगणैःसहश्मशानेवसन्तिस्वालोकान्संहर्तुमुपचक्रमेतदा
शिवःकेनचिद्दंशेनबटुकभैरवेभूत्वातत्समीपेपादुर्भूतोतिक्षुधितस्तन्मार्गीरुदन्नरोष्टतस्मैभद्रकालीदययास्तन्यंददौस्तन्येनस
हतस्यांतंकालकूटंनिर्गमयिष्यामीत्यभिसंधायतद्धपानमात्रएवसोप्यतिक्रूरोभूत्वातयासहजगत्संहर्तुमारभशिवस्तयोस्त
द्भूतगणाश्चोच्चप्रचारवत्कसंध्यासमयेषुतत्सन्निधानंदनृत्तप्रदर्शनेनतेभ्योजगत्संरक्षणीयमितिमत्वासंध्यासुनृतंकरोतीति॥२४

DR. CHAU DAJI MEMORIAL अन्तर भाऊदाजी इन्स्टीट्यूट ऑफ ओरिएंटल रिसर्च

नि
अनुशासत्वेनु श्मशानवासस्तवकिमर्थइतिउमयापृष्टेनशिवेनसकलप्रजाहितकामोस्मशानवासिनांभूतानांदग्धस्तत्रगत्वा
मयाकृतःप्रदक्षिणानन्मेध्यमेवसतांमोक्षकांक्षिणामित्युक्तं। पुराब्रह्मादयःसृजद्भोराभूतसंघान्बलोद्धतान्॥ तेभूतसंघायेति
स्मसृष्टास्तेनास्तिलाःप्रजाः॥ उग्राणांनिग्रहेतेषांसोरुद्रोमामयोजयत्॥ घोराहतामयात्रस्तरक्षितास्त्वाखिलाःप्रजाः॥श्मशा
नादपिमेस्थानान्मान्यंमेध्यतमंभुवि।मुनिभिर्मेध्यमित्युक्तं स्थानंयत्रवसाम्यहं॥ अत्रस्थिर्ब्रह्मवीद्रोमोक्षकोमेस्कसेव्यते॥श्म
ध्यान्हेसंध्ययोस्तत्रनृत्तेरुद्रेदेवे॥ आयुष्कोमैरवरुद्रेवानगंतव्यमितिस्थितिः॥ सर्वलोकहितार्थाय श्मशानेनिवसाम्यहं॥नि
त्यंतेनश्मशानस्यशिवावस्थानतःपरिनत्वादेवप्रह्लादेननृसिंहमीत्यर्थेतीर्थयात्रांकुर्वताश्मशानंगत्वातत्रसन्निहितोमहाका
लःशिवोर्पितइत्यर्थः॥ वामनपुराणंतेदृष्ट्वासमहाकालंकालंकालांतकारकं॥ यमसंयमनंमृत्योर्मृत्युंचित्रवपुस्थितं॥श्मशा
ननिलयंशंभुं भूतनाथंजगत्पतिं॥ पूजयित्वाशूलधरंजगामपरिषन्मतीति॥ भागवतेनुनिरतिशयस्वात्मानंदास्वादनित्यतृप्त
स्यतुच्छीकृतसकलविषयभोगस्यसर्वेषुस्थानानुलेपनादिषुतुल्यदृष्टेः शिवस्यकैलासादिषिवश्मशानेषुवासस्तत्तौल्य
प्रदर्शनायेतिनिरूपितं॥ तत्रहिएतस्यांसांध्यसंध्यायांभगवान्भूतभावनः।परितोभूतपरिषद्भिर्वृतोनटतिभूतराट्। श्मशा
नचक्रानिलधूलिधूम्रविकीर्णविद्योतिजटाकलापः॥ भस्मावगुंठामलरुक्मदेहोदेवस्त्रिभिःपश्यतिदेवरत्नइतिस्तुतिंप्रत्यु

क्तवताक्ष्येपेनपरमेश्वरस्यततः शिवस्यश्मशानवासतद्भस्मानुलेपनादिकिमर्थमित्यकां क्षायामुक्त ॥ ततस्तलोकेस्वज
नः परोवानात्यादतोनोतकश्चिद्विगर्त्यः वयंचैतैर्यच्चरणापविद्धामाशास्महेजावतमुक्तभोगा ॥ यस्यानव द्यंचरितंमनीषिणोगृण
त्यविद्यापटलंविभित्सवः ॥ निरस्तसाम्यातिशयोपियः स्वयंपिशाचचर्यामचरद्गतिः सतां ॥ हसंतियस्याचरितंहिदुर्भगाः स्वा
त्मन्रतस्याविदुषःसमाहितं । यैर्वस्त्रमाल्याभरणानुलेपनैःस्वभोजनंस्वात्मतयोपलालितं ॥ यद्भादयोयत्कृतसेतुपालाय
त्कारणंविश्वमिदंहिमायाः ॥ आज्ञाकरियस्यपिशाचचर्याअहोविभूम्नश्चरितंविडंबनं ॥ एवंविधंशिवचरितरहस्यंदेवैरपि
ज्ञातुमशक्यंतत्स्वरूपकथनेतवकोधिकारइत्याशंक्यनइहतस्यतत्वोद्भावनार्थमिदंभवतिकिंतत्रार्थमित्याह । श्रीकंदना
यकचरित्ररहस्यमीदृशंतादृशीःकइहवेत्तिनरःकरोवा ॥ त्वन्नामरूपगुणचिंतनपुण्यलेशव्याजेनकेनविदधातुमिहश्रमो
मे ॥ ४७ ॥ अत्रैतादृशीरीतिरित्यनेनशंकास्पददोषांतरपरिहारोपिसूचितः ॥ शिवपार्षदाःखल्वतिक्रूरागर्हितवृत्तयश्चभू
तप्रेतपिशाचराक्षसतिर्यग्जात्यादिरूपाः । अतिभीषणविकृतानेनाद्याकाणःसदामांसमक्षणादिगर्हितवृत्तयश्चबहव
ः प्रायेणतत्रवर्ण्यंते ॥ हरिवंशेकैलासयात्रायांतपश्चरतेकृष्णायवरंदातुं शिवस्यप्रस्तावेनतत्पार्षदाश्चेष्टावर्णिताः शिव
स्यपरमंमंगलास्पदत्वेकथमिदमुपपद्यतइतितस्यदोषत्वशंकास्पदस्यैवंपरिहारः कूर्मपुराणे ॥ भगवन्भूतभव्येशमहादेवं ३५

विकापते ॥ त्वमेवपुत्रमिच्छामित्वयावासदृशंस्मृतमितिप्रार्थितवंतंब्रह्माणंप्रतियद्दर्शितं भगवतातत्करिष्यामिपुत्रक ॥ वि
ज्ञानमैश्वर्यदिव्यमुत्सत्स्यतितवानघमितिवरंप्रदायपरमशिवस्तस्यपुरवालिललोहितरूद्रमूर्तिमास्थायप्रादुर्भूतअजाःसृजे
तितेननियुक्तःस्वात्मानासदृशान्रुद्रान्निर्मलान्नीललोहितान् ॥ जरामरणनिर्मुक्तान्ससर्जपरमेश्वरः ॥ ततस्तेनतुमास्त्राक्षी
रीदृशीमृत्युवर्जिताः ॥ अन्याःसृजत्वंभूतेशजन्ममृत्युसमन्विताइतितेनप्रार्थितःनास्तिमेतादृशः सर्गः सृजत्वंविविधाःप्रजाइति
तमेवसृष्टेनियुज्यततः प्रभृतिनिवृत्तसृष्टिव्यापारेनिश्चलः स्तिमितस्तेनस्थाणुनामाबभूवेत्युपाख्यायतेशैवेलिंगादित्यपुराणादिष्व
प्येकमेवोपाख्यायतेतत्राशिवेनस्वसदृशारुद्राः सृष्टास्तेस्वोपासनाविशेषैःस्वसायुज्यंलब्धवंतःपरमानंदरूपारुद्रास्तानंप्राप्तएव
स्वयंब्रह्मांडमध्येब्रह्मपुरवादाविर्भूतांस्थाणुविशालाक्षसंज्ञितांनीललोहितमूर्तिमास्थायक्रीडतापरमशिवेनलीलार्थंस्वा
नुचरत्वेनसृष्टाअन्येषांशिवसादृश्यसंभेदात् ॥ तेचदेवगंधर्वविद्याधरमनुष्यराक्षसभूतप्रेतपिशाचतीर्यगादिनानाजातिषु
सृष्टाःकूर्मपुराणेसृष्टितोनिवृत्यनंतरंततःसभगवान्ब्रह्मावीक्ष्यदेवंत्रिलोचनं ॥ सहैवैमानसैरुद्रैःप्रीतिविस्फारिलोचनः ॥
ज्ञात्वापरतरंभावंममैश्वर्यंज्ञानचक्षुषा ॥ तुष्टावजगतामेकंकृत्वाशिरसिचांजलिमिति ॥ ब्रह्मणाशिवस्यतत्सृष्टसकलमान
सरुद्रैःसहितस्यस्तोत्रंकृतमित्युपक्रम्यवक्ष्यतेस्तोत्रेप्रहीणशोकैर्विविधैर्भूतैःपरिवृतायतइतितत्सृष्टरुद्राणांशिवसायुज्य

प्राप्याविनश्वरफलशोकानांविविधभूततत्वस्योक्तं॥ अतएवचानंतरत्वंप्राप्यास्तदनंतरंयस्त्वमभ्यर्थितंब्रह्मन्पुत्रतेभवेतान
ध॥कृतंमयातत्सकलंसृजत्वंविविधंजगदित्याद्युपदिष्टवतःशिवस्यावधानेसेहेवमानेसेःपुत्रैःक्षणांदंतरधीयतेति॥ततस्ताहि॰
त्योक्तिर्महाभारतेशांतिपर्वणिरुद्राणामपिचेशानंगोप्तारंविदधेप्रभुः॥महात्मानंमहादेवंविरूपाक्षंत्रिलोचनमितिशिवेनतेषां
रुद्राणांनीललोहितानुचरत्वंकल्पितमित्युक्तत्वाच्चतदिदंशिवसायुज्यंगतानामेवनीललोहितानुचरत्वंकल्पितमित्युक्तत्वाच्च
तदिदंशिवसायुज्यंगतानामेवनीललोहितानुचरपारिषदत्वग्रहणंतथानानाजातिरूपतयाघोरशांतविविधाकारत्वंच
स्पष्टमेवप्रतिपादितंसौपर्णिकपर्वणिहिपरोलप्रतीकाशाःप्रादुरासन्महारवाः॥१ववराहाष्ट्ररूपाश्चहयगोमायुगोमुखाः।
व्यक्ष्यमार्जारवदनाव्याघ्रद्वीपिमुखास्तथा॥क्रूरवक्त्राःध्रुवमुखाःशुकवक्त्रास्तथैवच।महाराजसवक्त्राश्चहंसवक्त्राः
सितप्रभाः॥दार्वाघाटमुखाश्चापिचाषवक्त्रास्तथैवच।कूर्मवक्त्रमुखाश्चैवशिशुमारमुखास्तथा।महामकरवक्त्राश्च
शंखवर्णास्तथैवच॥तथैवशिरसोराजन्नृक्षवक्त्राश्चभीषणाः॥प्रदीप्तजिह्वनेत्रास्याज्वालावर्णास्तथैवच।मेषवक्त्रास्तथै
वान्येतथाच्छागमुखावान्नृप॥शंखाभाःशंखवक्त्राश्चशंखवर्णास्तथैवच।शंखमालापरिकराःशंखध्वनिरामस्वनाः॥जटा ध
राःपंचशिखास्तथामुंडाःकृशोदराः॥चतुर्दंष्ट्राश्चतुर्जिह्वाःशंकुकर्णाःकृशोदराः॥किरीटिनोमौलिधरास्तथाकुंचितमूर्द्ध ३६

जाः॥उष्णीषिणोमुकुटिनश्चारुवक्त्राःस्वलंकृताः॥पद्मोत्पलापीडधरणस्तथाकुमुदधारिणः॥महात्म्येनचसंयुक्ताःशतशो
थसहस्रशः।शतधाचक्रहस्ताश्चतथामुसलपाणयः॥भुशुंडीपाशहस्ताश्चभारता।पृष्ठेषुवद्देषुधयश्चित्रचापरणोत्सकाः॥
सध्वजाःसपताकाश्चसघंटाःसपरश्वधाः॥महापाशोद्यतकरास्तथालगुडपाणयः॥स्थूणाहस्ताःह्रस्वहस्ताःसर्पाञ्छिन
किरीटिनः॥महासर्पांगदधराश्चित्राभरणधारिणः॥रजोध्वस्ताःपंकदिग्धाःसर्वेचित्रांबरस्रजः।नीलांगाःकमलांगाश्चमुं
डवक्त्रास्तथैवच॥भेरीशंखमृदंगांस्तेसहस्रशरानकगोमुखान्॥अवादयन्पारिषदाःसंतुष्टाःकमलप्रभाः॥गायमानास्त
थैवान्येप्रहृष्टाःपुरुषर्षभाः॥लंघयतःप्लवंतश्चवलंतश्चमहाबलाः॥धावंतश्चवनावद्धाःपवनोद्धूतमूर्धजाः॥मत्ताइ
वमहानागाविनदंतोमुहुर्मुहुः॥स्फुरंतोघोररूपाश्चशूलपट्टिशपाणयः॥रत्नचित्रांगदधराःसमुद्यतकरास्तथा॥हतारोद्वि
षतांशूराःप्रसह्यासह्यविक्रमाः॥पातालेस्थास्यमानांश्चमांसान्नकृतभोजनाः॥चूडालाःकर्णिकाश्चप्रकृशाभयदारुणाः॥अतिह्र
स्वातिदीर्घाश्चप्रबलाश्रुतिभैरवाः॥कामरूपकराःसिद्धास्त्रैलोक्यसेश्वरेश्वराः॥निरानंदाःप्रमुदिताबागीशावीतमत्सराः॥प्राप्ताश्च
गुणमैश्वर्ययेनयांतिस्मविस्मयं॥येषांविस्मयतेनित्यंकर्मभिर्भगवान्भवः॥मनोवाक्कायनिरतान्पातिपुत्रानिवौरसान्॥पिबत्स
त्रवसांश्चान्येकुरुश्रेष्ठद्विषंतथा॥श्रुतेनब्रह्मचर्येणतपसाचदमेनच॥येसमाराध्यशूलांकंभवत्सायुज्यमागताइति॥अ

तएवविविधाकारैःक्रूरशांतानीलोहितनियोगात्जगत्संरक्षणार्थंतत्रस्थिताः॥रुद्राध्यायेइषुमद्भोधन्वाविभ्यश्चेत्यादिश्लोकैः श्वपतिभ्यश्चवोनमइत्यंतैश्चतुर्थ्यंतपदैःप्रतिपादिताः॥एतएवतत्रसहस्राणिसहस्रशाइत्यनुवाकेदेवव्रतेषु प्रथमस्मान्निचनानावस्थानस्थितत्वयासकलदेवनियामकत्वयाचप्रतिपादिताः॥एतएवायुर्यज्ञसूक्तेदिव्यागणाबहुरूपाःपुराणइतिविराद्विसायुज्यं प्राप्यदिव्यस्थानेस्थितपुराणाःसंतएवलीलार्थावतारादिभिःप्रायेणबहुरूपाउक्ताः॥एवंशिवेनस्वलीलार्थंकृतायारुद्रसृष्टेस्तिर्यग्योन्याकारपर्यंतायाःपृथिव्याधर्मसंस्थापनार्थंव्यवतितीर्षतानारायणेनानुषंगिकंस्वार्थत्वेदेवान्प्रत्युक्तमितिसभापर्वणिप्रतिपादितं॥तत्रेदंवान्यतिभगद्वैवचनं॥जायध्वंमानुषेलोकेसर्वभूतमहेश्वरः॥जंगमानिविशालाक्षोभूतान्येकात्मनाऽसृजत्॥ जायतामितिगोविंदस्तिर्यग्योनिगतेरपि॥तानिसर्वाणिसर्वज्ञःसस्कराणिस्करेश्वराइति॥अजयध्वंमानुषेलोकइतिनियोगानंतरंकथंदेवैर्गर्हितमानुषंजन्मप्राप्तव्यमितितेषामनुशयपरिहारार्थमेवं॥भगवानुवाच॥सर्वभूतमहेश्वरःसर्वज्ञोविशालाक्षोनीललोहितरुद्रःसस्कराद्रेणि सर्वाणिजंगमानिभूतानिएकात्मनादेवमनुष्यतिर्यक्षु विशेषतोरेणस्वात्मतुल्यपराक्रमत्वादिनैकरूप्येणासृजत्॥किमर्थंगोविंदोधर्मसंस्थापनार्थायभूम्यामवतरन्विष्णुस्तीर्यग्योनिगतेरपि॥सहायैःसहजायतामित्यर्थंतदे सर्वेषामपिविशेषेणसृष्टौहितीर्यग्योनिजन्मन्यपिनविचिकित्साभवति अतोमनुष्यजन्मनिभवद्भिर्विचिकित्सानकार्या॥ ३७

॥तदनंतरंतथैवदेवैःकृतमित्यप्यनंतरश्लोकेनदर्शितं॥एवमुक्तास्तकृष्णेनसर्वएवदिवौकसः॥दैत्यदानवहंतारःसंभूताभुवनेश्वरा इति॥अतोविविधाकारेषु शिवपार्श्वदेषुयेपिशाचादिरूपास्तेषांतत्तज्जात्युचिताहारस्तत्रतत्रप्रतिपादितः॥अत्यंतविष्णुभक्तस्य घंटाकर्णस्यापिहि पिशाचस्यमांसरुधिराहारःकैलासयात्रायामेवभूयसाप्रपंचितः॥शवमांसादिभक्षणंयेशास्त्रादिशास्त्रप्राप्तमित्यपिघंटाकर्णेनकृष्णंप्रत्युक्तमितितत्रैवप्रतिपादितं॥ब्राह्मणस्यहतस्यायशतमादायसत्तमं॥द्विधाकृत्यचयोरंपिशितंकेशवार्जुन॥ततःखंडंसमादायअद्भिरभ्युक्ष्ययत्नतः॥निधायपात्रेतुरुक्मेनमस्कृत्यजनार्दनं॥इदंभोक्तुंदेवेशंप्रांजलिप्रणतश्चितः॥गृह्णाणेदंजगन्नाथभक्ष्यंयोग्यंतवप्रभो॥भवद्भिर्जगन्नाथग्रात्यंसर्वात्मनाहरे॥किंचित्तत्रार्चनंविष्णोरत्रकार्याविचारणा॥दत्तंयद्भक्तिनम्रेणग्राह्यंतत्तत्रचाभिनाहरे॥नवंरुक्मसंस्कृतेभक्ष्यंब्राह्मणंचावमुक्तमं॥सेवंषामेववर्णानांशवेब्राह्मणमुत्तमं॥ अस्माकंपिशिताशानांशास्त्रेनिश्चितमेवहि॥अतःकेषांचनशिवपार्षदानांपिशाचादिरूपाणामवस्थागमनादिसमयेषुस्वजात्युचितमांसरुधिराद्याहारःस्वाभिनोनदोषमावहतीतिसर्वमनवद्यंएतेनलुप्तक्रियायाश्चचयेमानिनेभिक्षवेतवे॥अनिच्छन्नप्यदाबालंरुद्रायेवेशतींगिरमित्यादिकमुक्तवतस्तस्मोगुणोद्विरुक्तस्यदक्षस्यसद्योदंडपतनंभागवतादिवर्णितंमुषाश्रित्यापियेकुदृष्टयस्तामसास्तथैवप्रलपंति॥श्मशानवासनिरतोनित्यंक्षुब्धैःपिशाचादिभिःसहवसन्रुद्रःक्रूरैः॥साक्षिकैर्नसेव्य

इतिनिरस्तावेदितव्याः किंचदेवा अपिकृतात्मसंशो धनाः रुद्राएवशिवस्यदर्शनंलप्स्यंतेनान्येयेतिपार्षदवचनैर्बहु धावगतं । व
थाहिहरिवंशेतावत्त्रिपुरवधकांक्षिभिर्देवैर्ब्रह्मणाप्रेरितैः शिवालयप्राप्त्यर्थं शिवस्यदर्शनलाभार्थंचतपश्चीर्णमित्युक्तंप्रति
गृत्यतुतद्वाक्यमनोभिर्वाग्भिरेवच ॥ भूमिंभित्वेपदिरेसर्वेसहंरीद्रेश्वभारत ॥ विध्यापादेवमेरोश्चमध्येचपृथिवीतले ॥ तपसोग्र
णयोगज्ञाःसर्वेतमुनयोनृपा । काश्यपेयाहरंप्राप्ताजपंतोब्रह्मसंहितां ॥ परिधानानिचर्माणिमृदून्यजिनकानिच ॥ स्वयंकृतानो
कृष्णानांमृगाणांकुरुसत्तम ॥ गृहीतानिविमुक्तानिदेवर्ष्योवनचारिभिः ॥ अंतरीक्षंअथोत्पत्यविविशुर्मायया वृते ॥ हरालयंसु
राःसर्वेव्याघ्रचर्मनिवासिनइति ॥ वामनपुराणेप्युक्तं ॥ ततोमुरारिंसर्वेपितामह्येत्यसकराकरास्तथा ॥ ऊचुर्देवंनमस्कृत्यजग
न्नाथंचराचरं ॥ तच्छ्रुत्वाभगवान्प्राहगच्छामोहरमंदिरं ॥ सर्वेत्यंतिमहाप्राज्ञाजगत्सृष्टिकारणं ॥ तथोक्त्वावासुदेवेनदे
वाः शक्रपुरोगमाः ॥ जनार्दनंपुरस्कृत्यजग्मुस्तेहरमंदिरं ॥ ततस्तेदेवं वृषभंददृशुर्नंदिनं ॥ शून्यंगिरिंतुपश्यंतिअज्ञानति
मिरावृताः ॥ तान्मूढदृष्टीन्संप्रेक्ष्यदेवान्विष्णुर्महाद्युतिः ॥ प्रोवाचकिंनपश्यध्वंमहेशंपुरतः स्थितं ॥ तमूचुर्नैवदेवेशंपश्या
मोगिरिजापतिं ॥ नविद्मःकारणंतत्रयेनदृष्टिर्हृताहिनः ॥ तानुवाचजगन्मूर्तिर्यूयंदेवास्तुसागसः ॥ पापिष्ठागर्ह्यहंतारोमूढा
न्याश्चार्थरात्पराः ॥ तेनज्ञानंविवेकोवोहतोदेवेनशूलिना ॥ येनाग्रतःस्थितंमापिपश्यंतोपिनपश्यथ ॥ तस्मात्कायविशुद्ध्य ३८

र्थंदेवद्रष्ट्यर्थमादरात् । तप्तकृच्छ्रेणसंशुद्धाः कुरुध्वंस्नानमीश्वरमिति ॥ तदनंतरंचतप्तकृच्छ्राचरणपूर्वकं ॥ शिवस्यमहास्नपनादि
पूजांकृत्वादेवैः शिवदर्शनंलब्धमित्यग्रेप्रपंचितं ॥ स्कांदेकेदारखंडेतुमेरुपृष्ठेवराचरावधोपायंमंत्रयंतोदेवामहूतातपस्याय
लब्धौबलो रावणस्तदधिकंतपोबलंविनाभवद्भिर्जेतुंप्रशक्यइतिविष्णुनाबोधितास्तथातपः कर्तुमक्षमाः शिवमेवप्रसाद्य
रावणंजय्येष्यामइतिमनीषयाशिरलोकंगताः शिवराजधानीद्वारस्थितेनंदिकेश्वरेणतपोभिः कायसंशो धनयकृत्वाभ
वद्भिर्द्रष्टुंनशक्यः शिवइतिबोधिताप्राक्तस्मिन्कृतापराधंस्वेनशप्तरावणंस्वयमपिजिघांसतातेनैवंकुर्वंतीत्वा विष्णुप्रद
र्शितः विष्णुनाचयंतपः कर्तुमक्षमाणांदेवानामभिप्रायंकार्यं ॥ रावणस्यतपोवीर्यंभवतांशानाद्यंतानुचिंतसीतानुरागंप्राह्य
नुवृत्तिसंघादेनंकारयित्वानिर्वहणीयमितितदुपायोपदेशेनदेवाः समाश्वासितास्तदर्थं विष्णुःसीतारूपयाब्रह्मविद्यया
सहस्वयंप्रवर्तीर्णइतिप्रपंचितं ॥ तत्रदेवानांशिवदर्शनार्थंतपश्चरणाभावान्शिवदर्शनंनासीदितिस्पष्टमेवोक्तं ॥ एवमन्वयव्य
तिरेकाभ्यांपुराणेषुरुद्रैरेवद्रष्टुंशक्यः शिवइतिप्रतिपादितं ॥ भागवतेपिदक्षस्यमलिनांतःकरणस्ययज्ञार्थंशिवानाह्वानोप
येनैवतद्दर्शनाभावमुपपाद्यवीरभद्रकृता ध्वरविध्वंसनानंतरंदक्षसंरक्षणार्थंदेवैः सहकैलासंगत्वाबहुधाप्रसादितवंतंब्रह्म
ण्यमनुरुध्यदीक्षितवतः शिवस्यप्रसादेनैवसमभावंशिवावलोकनमासीदितिप्रतिपादितं ॥ संधीयमानेशीर्षेतुदक्षोरुद्राभि

वीक्षितः॥ सद्यःस्फुरदइवोतस्त्रोदद्दरोच्चायतोमृदुं॥ तदावृषध्वजद्वेषकलिलात्माप्रजापति॥ शिवावलोकादमवच्छरच्चंद्रइवा
मलः॥शिवस्तवायकृतधीर्नीशक्रोदनुरागतः॥ औत्कंठ्याद्बाष्पकलयासंपरेतांस्कंतांस्मरन्निति॥महाभारतेपि॥ बहुका
लंतपसाशिवंप्रसादितवतोनारायणस्यशिवदर्शनंप्रस्तावेशिवस्यबहुतपःक्षीणपापैरेवद्रष्टुंशक्यत्वमुक्तं।द्रोणपर्वणिच॥
वाचाधिकैःस्फुटमसांबुवर्जितंदिवं धरणिंचंद्रमूर्यौ॥हुताशवायुयजमानंस्फरेशंनालंद्रष्टुं भिन्नवृत्तानराये॥येचानृतानां
स्तिकाःपापशीलब्रह्महत्विषोवाप्यमृतस्ययोनिं॥यंपश्यंतिब्राह्मणास्तेधुवंस्तःक्षीणेपापेमनसातीतशोकाः॥तन्निष्पाप
पसादेवमीड्यंतंभक्त्यैवेविश्वरूपंददर्शेत्यलमतिप्रपंचेन॥अत्रश्रीकंठेनिसंबो धनेनभूकैलासवासिनःश्रीकंठनाम्नाप्र
सिद्धस्यपार्वतीपरिणेतुरेतद्ब्रह्मादाधिपतेःश्रीकंठमूर्तेरेवमादिचरितानिनतुसाक्षात्परमशिवस्येतिसूचितं॥एवंशिवस्यप
रब्रह्मभावंसाधकप्रमाणैर्बाधकनिरासेश्चप्रसाध्यस्वस्यतस्मिन्भक्तिदार्ढ्यभाशास्ते॥शश्वच्छेतोममपशुपतेशाल्मली
पुष्पतुल्यानन्योदवानतिलध्युफलप्रापकान्वर्जयित्वा॥पादांभोजतवपरिमलंदिव्यभृंगावलीढंचंद्रापीडश्रयतुसततंचंच
रीकस्यलीलां॥दिव्यभृंगात्वत्सरावमधुकृतःऋग्वेदएवपुष्पंयजूंष्येवमधुकृतः॥यजुर्वेदएवपुष्पंसामान्येवमधुकृतःसा
मवेदएवपुष्पंअथर्वांगिरसएवमधुकृतइतिहासपुराणंपुष्पमितिछांदोगोपनिषदुक्तः॥भृंगस्तैरवलीढतेषांप्रतिपा

द्यतयासेवनीयइत्यर्थः॥ अथैवंकृतेस्तोत्रंशिवस्यचरणारविंदयोः पुष्पांजलिरूपतयासमर्पयति॥ ब्रह्मेंद्रेंद्रप्रमुखा
दिनुतब्रह्मतर्कस्तवोयंभक्तियात्यस्त्वमितिभगवन्निर्मितोभक्तिमात्रात्॥अंघ्रिद्वंद्वेतवकरुणयानिर्गुणोपित्वदीये
पूजापुष्पप्रकरपदवीमेवपुष्णातुनित्यं॥शिवस्यभक्तियात्यत्वंभावयात्यमनीडाख्यंभावाभावकरंशिवमितिश्वेता
श्वतरोपनिषन्मंत्रेणकृतकृत्यस्यतृप्तस्यममकिंकियतेनरैः॥बहिर्वाभ्यंतरैरापिमयाभावोपिगृह्यतइत्यादिशिवव
चनैश्च॥ ॥ इतिश्रीमदद्वैतविद्याचार्यश्रीमद्विश्वजिद्याजिश्रीरंगराजाध्वरिवरसूनोःश्रीमद्दीक्षितस्य
कृतौब्रह्मतर्कस्तवविवरणंसमाप्तं॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतिश्रीब्रह्मतर्कसमाप्तः॥